श्री ललिता सहस्रनाम स्तोत्रम्

Shri Lalita Sahasranamam

Source: 1927 Nirnaya Sagar third edition — controlling historical Sanskrit scan. Also compared: 1927 edition PDF — introduction/dhyana on 27–42; name, closing and colophon on selected pages 51–263; Internet Archive catalogue metadata — historical edition and digitization distinguished; 1985 Tirumala Tirupati Devasthanams print on Wikimedia Commons — comparison witness only.

अगस्त्य का प्रश्न

SHLOKA 1

अगस्त्य उवाच

अश्वानन महाबुद्धे सर्वशास्त्रविशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥१॥

aśvānana mahābuddhe sarvaśāstraviśārada |
kathitaṃ lalitādevyāścaritaṃ paramādbhutam ||1||

SHLOKA 2

पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनम् ।
भण्डासुरवधश्चैव विस्तरेण त्वयोदितः ॥२॥

pūrvaṃ prādurbhavo mātustataḥ paṭṭābhiṣecanam |
bhaṇḍāsuravadhaścaiva vistareṇa tvayoditaḥ ||2||

SHLOKA 3

वर्णितं श्रीपुरं चापि महाविभवविस्तरम् ।
श्रीमत्पञ्चदशाक्षर्या महिमा वर्णितस्तथा ॥३॥

varṇitaṃ śrīpuraṃ cāpi mahāvibhavavistaram |
śrīmatpañcadaśākṣaryā mahimā varṇitastathā ||3||

SHLOKA 4

षोढान्यासादयो न्यासा न्यासखण्डे समीरिताः ॥४॥

ṣoḍhānyāsādayo nyāsā nyāsakhaṇḍe samīritāḥ ||4||

SHLOKA 5

अन्तर्यागक्रमश्चैव बहिर्यागक्रमस्तथा ।
महायागक्रमश्चैव पूजाखण्डे प्रकीर्तितः ॥५॥

antaryāgakramaścaiva bahiryāgakramastathā |
mahāyāgakramaścaiva pūjākhaṇḍe prakīrtitaḥ ||5||

SHLOKA 6

पुरश्चरणखण्डे तु जपलक्षणमीरितम् ।
होमखण्डे त्वया प्रोक्तो होमद्रव्यविधिक्रमः ॥६॥

puraścaraṇakhaṇḍe tu japalakṣaṇamīritam |
homakhaṇḍe tvayā prokto homadravyavidhikramaḥ ||6||

SHLOKA 7

चक्रराजस्य विद्यायाः श्रीदेव्या देशिकात्मनोः ।
रहस्यखण्डे तादात्म्यं परस्परमुदीरितम् ॥
स्तोत्रखण्डे बहुविधाः स्तुतयः परिकीर्तिताः ॥७॥

cakrarājasya vidyāyāḥ śrīdevyā deśikātmanoḥ |
rahasyakhaṇḍe tādātmyaṃ parasparamudīritam ||
stotrakhaṇḍe bahuvidhāḥ stutayaḥ parikīrtitāḥ ||7||

SHLOKA 8

मन्त्रिणीदण्डिनीदेव्योः प्रोक्ते नामसहस्रके ।
न तु श्रीललितादेव्याः प्रोक्तं नामसहस्रकम् ॥८॥

mantriṇīdaṇḍinīdevyoḥ prokte nāmasahasrake |
na tu śrīlalitādevyāḥ proktaṃ nāmasahasrakam ||8||

SHLOKA 9

तत्र मे संशयो जातो हयग्रीव दयानिधे ।
किं वा त्वया विस्मृतं तज्ज्ञात्वा वा समुपेक्षितम् ॥९॥

tatra me saṃśayo jāto hayagrīva dayānidhe |
kiṃ vā tvayā vismṛtaṃ tajjñātvā vā samupekṣitam ||9||

SHLOKA 10

मम वा योग्यता नास्ति श्रोतुं नामसहस्रकम् ।
किमर्थं भवता नोक्तं तत्र मे कारणं वद ॥१०॥

mama vā yogyatā nāsti śrotuṃ nāmasahasrakam |
kimarthaṃ bhavatā noktaṃ tatra me kāraṇaṃ vada ||10||

हयग्रीव का उत्तर और नित्य पाठ

SHLOKA 11

सूत उवाच

इति पृष्टो हयग्रीवो मुनिना कुम्भजन्मना ।
प्रहृष्टो वचनं प्राह तापसं कुम्भसम्भवम् ॥११॥

iti pṛṣṭo hayagrīvo muninā kumbhajanmanā |
prahṛṣṭo vacanaṃ prāha tāpasaṃ kumbhasambhavam ||11||

SHLOKA 12

लोपामुद्रापतेऽगस्त्य सावधानमनाः शृणु ।
नाम्नां सहस्रं यन्नोक्तं कारणं तद्वदामि ते ॥१२॥

lopāmudrāpate'gastya sāvadhānamanāḥ śṛṇu |
nāmnāṃ sahasraṃ yannoktaṃ kāraṇaṃ tadvadāmi te ||12||

SHLOKA 13

रहस्यमिति मत्वाहं नोक्तवांस्ते न चान्यथा ।
पुनश्च पृच्छसे भक्त्या तस्मात्तत्ते वदाम्यहम् ॥१३॥

rahasyamiti matvāhaṃ noktavāṃste na cānyathā |
punaśca pṛcchase bhaktyā tasmāttatte vadāmyaham ||13||

SHLOKA 14

ब्रूयाच्छिष्याय भक्ताय रहस्यमपि देशिकः ।
भवता न प्रदेयं स्यादभक्ताय कदाचन ॥१४॥

brūyācchiṣyāya bhaktāya rahasyamapi deśikaḥ |
bhavatā na pradeyaṃ syādabhaktāya kadācana ||14||

SHLOKA 15

न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ।
श्रीमातृभक्तियुक्ताय श्रीविद्याराजवेदिने ॥१५॥

na śaṭhāya na duṣṭāya nāviśvāsāya karhicit |
śrīmātṛbhaktiyuktāya śrīvidyārājavedine ||15||

SHLOKA 16

उपासकाय शुद्धाय देयं नामसहस्रकम् ।
यानि नामसहस्राणि सद्यःसिद्धिप्रदानि वै ॥१६॥

upāsakāya śuddhāya deyaṃ nāmasahasrakam |
yāni nāmasahasrāṇi sadyaḥsiddhipradāni vai ||16||

SHLOKA 17

तन्त्रेषु ललितादेव्यास्तेषु मुख्यमिदं मुने ।
श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा ॥१७॥

tantreṣu lalitādevyāsteṣu mukhyamidaṃ mune |
śrīvidyaiva tu mantrāṇāṃ tatra kādiryathā parā ||17||

SHLOKA 18

पुराणां श्रीपुरमिव शक्तीनां ललिता यथा ।
श्रीविद्योपासकानां च यथा देवो वरः शिवः ॥१८॥

purāṇāṃ śrīpuramiva śaktīnāṃ lalitā yathā |
śrīvidyopāsakānāṃ ca yathā devo varaḥ śivaḥ ||18||

SHLOKA 19

तथा नामसहस्रेषु वरमेतत्प्रकीर्तितम् ॥१९॥

tathā nāmasahasreṣu varametatprakīrtitam ||19||

SHLOKA 20

यथास्य पठनाद्देवी प्रीयते ललिताम्बिका ।
अन्यनामसहस्रस्य पाठान्न प्रीयते तथा ।
श्रीमातुः प्रीतये तस्मादनिशं कीर्तयेदिदम् ॥२०॥

yathāsya paṭhanāddevī prīyate lalitāmbikā |
anyanāmasahasrasya pāṭhānna prīyate tathā |
śrīmātuḥ prītaye tasmādaniśaṃ kīrtayedidam ||20||

SHLOKA 21

बिल्वपत्रैश्चक्रराजे योऽर्चयेल्ललिताम्बिकाम् ।
पद्मैर्वा तुलसीपत्रैरेभिर्नामसहस्रकैः ॥२१॥

bilvapatraiścakrarāje yo'rcayellalitāmbikām |
padmairvā tulasīpatrairebhirnāmasahasrakaiḥ ||21||

SHLOKA 22

सद्यः प्रसादं कुरुते तत्र सिंहासनेश्वरी ।
चक्राधिराजमभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ॥२२॥

sadyaḥ prasādaṃ kurute tatra siṃhāsaneśvarī |
cakrādhirājamabhyarcya japtvā pañcadaśākṣarīm ||22||

SHLOKA 23

जपान्ते कीर्तयेन्नित्यमिदं नामसहस्रकम् ।
जपपूजाद्यशक्तोऽपि पठेन्नामसहस्रकम् ॥२३॥

japānte kīrtayennityamidaṃ nāmasahasrakam |
japapūjādyaśakto'pi paṭhennāmasahasrakam ||23||

SHLOKA 24

साङ्गार्चने साङ्गजपे यत्फलं तदवाप्नुयात् ।
उपासने स्तुतीरन्याः पठेदभ्युदयो हि सः ॥२४॥

sāṅgārcane sāṅgajape yatphalaṃ tadavāpnuyāt |
upāsane stutīranyāḥ paṭhedabhyudayo hi saḥ ||24||

SHLOKA 25

इदं नामसहस्रं तु कीर्तयेन्नित्यकर्मवत् ।
चक्रराजार्चनं देव्या जपो नाम्नां च कीर्तनम् ॥२५॥

idaṃ nāmasahasraṃ tu kīrtayennityakarmavat |
cakrarājārcanaṃ devyā japo nāmnāṃ ca kīrtanam ||25||

SHLOKA 26

भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः ।
भक्तस्यावश्यकमिदं नामसाहस्रकीर्तनम् ॥२६॥

bhaktasya kṛtyametāvadanyadabhyudayaṃ viduḥ |
bhaktasyāvaśyakamidaṃ nāmasāhasrakīrtanam ||26||

वाग्देवियों द्वारा रचना और ललिता की आज्ञा

SHLOKA 27

तत्र हेतुं प्रवक्ष्यामि शृणु त्वं कुम्भसम्भव ।
पुरा श्रीललितादेवी भक्तानां हितकाम्यया ॥२७॥

tatra hetuṃ pravakṣyāmi śṛṇu tvaṃ kumbhasambhava |
purā śrīlalitādevī bhaktānāṃ hitakāmyayā ||27||

SHLOKA 28

वाग्देवीर्वशिनीमुख्याः समाहूयेदमब्रवीत् ।
वाग्देवता वशिन्याद्याः शृणुध्वं वचनं मम ॥२८॥

vāgdevīrvaśinīmukhyāḥ samāhūyedamabravīt |
vāgdevatā vaśinyādyāḥ śṛṇudhvaṃ vacanaṃ mama ||28||

SHLOKA 29

भवत्यो मत्प्रसादेन प्रोल्लसद्वाग्विभूतयः ।
मद्भक्तानां वाग्विभूतिप्रदाने विनियोजिताः ॥२९॥

bhavatyo matprasādena prollasadvāgvibhūtayaḥ |
madbhaktānāṃ vāgvibhūtipradāne viniyojitāḥ ||29||

SHLOKA 30

मच्चक्रस्य रहस्यज्ञा मम नामपरायणाः ।
मम स्तोत्रविधानाय तस्मादाज्ञापयामि वः ॥३०॥

maccakrasya rahasyajñā mama nāmaparāyaṇāḥ |
mama stotravidhānāya tasmādājñāpayāmi vaḥ ||30||

SHLOKA 31

कुरुध्वमङ्कितं स्तोत्रं मम नामसहस्रकैः ।
येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत् ॥३१॥

kurudhvamaṅkitaṃ stotraṃ mama nāmasahasrakaiḥ |
yena bhaktaiḥ stutāyā me sadyaḥ prītiḥ parā bhavet ||31||

SHLOKA 32

हयग्रीव उवाच

इत्याज्ञप्ता वचोदेव्यः श्रीदेव्या ललिताम्बया ।
रहस्यैर्नामभिर्दिव्यैश्चक्रुः स्तोत्रमनुत्तमम् ॥३२॥

ityājñaptā vacodevyaḥ śrīdevyā lalitāmbayā |
rahasyairnāmabhirdivyaiścakruḥ stotramanuttamam ||32||

SHLOKA 33

रहस्यनामसाहस्रमिति तद्विश्रुतं परम् ।
ततः कदाचित्सदसि स्थित्वा सिंहासनेऽम्बिका ॥३३॥

rahasyanāmasāhasramiti tadviśrutaṃ param |
tataḥ kadācitsadasi sthitvā siṃhāsane'mbikā ||33||

SHLOKA 34

स्वसेवावसरं प्रादात्सर्वेषां कुम्भसम्भव ।
सेवार्थमागतास्तत्र ब्रह्माणीब्रह्मकोटयः ॥३४॥

svasevāvasaraṃ prādātsarveṣāṃ kumbhasambhava |
sevārthamāgatāstatra brahmāṇībrahmakoṭayaḥ ||34||

SHLOKA 35

लक्ष्मीनारायणानां च कोटयः समुपागताः ।
गौरीकोटिसमेतानां रुद्राणामपि कोटयः ॥३५॥

lakṣmīnārāyaṇānāṃ ca koṭayaḥ samupāgatāḥ |
gaurīkoṭisametānāṃ rudrāṇāmapi koṭayaḥ ||35||

SHLOKA 36

मन्त्रिणीदण्डिनीमुख्याः सेवार्थं याः समागताः ।
शक्तयो विविधाकारास्तासां संख्या न विद्यते ॥३६॥

mantriṇīdaṇḍinīmukhyāḥ sevārthaṃ yāḥ samāgatāḥ |
śaktayo vividhākārāstāsāṃ saṃkhyā na vidyate ||36||

SHLOKA 37

दिव्यौघा मानवौघाश्च सिद्धौघाश्च समागताः ।
तत्र श्रीललितादेवी सर्वेषां दर्शनं ददौ ॥३७॥

divyaughā mānavaughāśca siddhaughāśca samāgatāḥ |
tatra śrīlalitādevī sarveṣāṃ darśanaṃ dadau ||37||

SHLOKA 38

तेषु दृष्ट्वोपविष्टेषु स्वे स्वे स्थाने यथाक्रमम् ।
तत्र श्रीललितादेवीकटाक्षक्षेपनोदिताः ॥३८॥

teṣu dṛṣṭvopaviṣṭeṣu sve sve sthāne yathākramam |
tatra śrīlalitādevīkaṭākṣakṣepanoditāḥ ||38||

SHLOKA 39

उत्थाय वशिनीमुख्या बद्धाञ्जलिपुटास्तदा ।
अस्तुवन्नामसाहस्रैः स्वकृतैर्ललिताम्बिकाम् ॥३९॥

utthāya vaśinīmukhyā baddhāñjaliputāstadā |
astuvannāmasāhasraiḥ svakṛtairlalitāmbikām ||39||

SHLOKA 40

श्रुत्वा स्तवं प्रसन्नाभूल्ललिता परमेश्वरी ।
सर्वे ते विस्मयं जग्मुर्ये तत्र सदसि स्थिताः ॥४०॥

śrutvā stavaṃ prasannābhūllalitā parameśvarī |
sarve te vismayaṃ jagmurye tatra sadasi sthitāḥ ||40||

SHLOKA 41

ततः प्रोवाच ललिता सदस्यान्देवतागणान् ।
ममाज्ञयैव वाग्देव्यश्चक्रुः स्तोत्रमनुत्तमम् ॥४१॥

tataḥ provāca lalitā sadasyāndevatāgaṇān |
mamājñayaiva vāgdevyaścakruḥ stotramanuttamam ||41||

SHLOKA 42

अङ्कितं नामभिर्दिव्यैर्मम प्रीतिविधायकैः ॥४२॥

aṅkitaṃ nāmabhirdivyairmama prītividhāyakaiḥ ||42||

SHLOKA 43

तत्पठध्वं सदा यूयं स्तोत्रं मत्प्रीतिवृद्धये ।
प्रवर्तयध्वं भक्तेषु मम नामसहस्रकम् ॥४३॥

tatpaṭhadhvaṃ sadā yūyaṃ stotraṃ matprītivṛddhaye |
pravartayadhvaṃ bhakteṣu mama nāmasahasrakam ||43||

SHLOKA 44

इदं नामसहस्रं मे यो भक्तः पठते सकृत् ।
मम प्रियतमो ज्ञेयस्तस्मै कामान्ददाम्यहम् ॥४४॥

idaṃ nāmasahasraṃ me yo bhaktaḥ paṭhate sakṛt |
mama priyatamo jñeyastasmai kāmāndadāmyaham ||44||

SHLOKA 45

श्रीचक्रे मां समभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ।
पश्चान्नामसहस्रं मे कीर्तयेन्मम तुष्टये ॥४५॥

śrīcakre māṃ samabhyarcya japtvā pañcadaśākṣarīm |
paścānnāmasahasraṃ me kīrtayenmama tuṣṭaye ||45||

SHLOKA 46

मामर्चयतु वा मा वा विद्यां जपतु वा न वा ।
कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदा ॥४६॥

māmarcayatu vā mā vā vidyāṃ japatu vā na vā |
kīrtayennāmasāhasramidaṃ matprītaye sadā ||46||

SHLOKA 47

मत्प्रीत्या सकलान्कामाँल्लभते नात्र संशयः ।
तस्मान्नामसहस्रं मे कीर्तयध्वं सदादरात् ॥४७॥

matprītyā sakalānkāmāṁllabhate nātra saṃśayaḥ |
tasmānnāmasahasraṃ me kīrtayadhvaṃ sadādarāt ||47||

SHLOKA 48

हयग्रीव उवाच

इति श्रीललितेशानी शास्ति देवान्सहानुगान् ॥४८॥

iti śrīlaliteśānī śāsti devānsahānugān ||48||

SHLOKA 49

तदाज्ञया तदारभ्य ब्रह्मविष्णुमहेश्वराः ।
शक्तयो मन्त्रिणीमुख्या इदं नामसहस्रकम् ॥४९॥

tadājñayā tadārabhya brahmaviṣṇumaheśvarāḥ |
śaktayo mantriṇīmukhyā idaṃ nāmasahasrakam ||49||

SHLOKA 50

पठन्ति भक्त्या सततं ललितापरितुष्टये ।
तस्मादवश्यं भक्तेन कीर्तनीयमिदं मुने ॥५०॥

paṭhanti bhaktyā satataṃ lalitāparituṣṭaye |
tasmādavaśyaṃ bhaktena kīrtanīyamidaṃ mune ||50||

SHLOKA 51

आवश्यकत्वे हेतुत्वे मया प्रोक्तो मुनीश्वर ।
इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया शृणु ॥५१॥

āvaśyakatve hetutve mayā prokto munīśvara |
idānīṃ nāmasāhasraṃ vakṣyāmi śraddhayā śṛṇu ||51||

ध्यान

SHLOKA 52

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामम्बिकाम् ॥५२॥

sindūrāruṇavigrahāṃ trinayanāṃ māṇikyamaulisphurattārānāyakaśekharāṃ smitamukhīmāpīnavakṣoruhām |
pāṇibhyāmalipūrṇaratnacaṣakaṃ raktotpalaṃ bibhratīṃ
saumyāṃ ratnaghaṭastharaktacaraṇāṃ dhyāyetparāmambikām ||52||

प्राकट्य और शिख-नख रूप

SHLOKA 52

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता ॥५२॥

śrīmātā śrīmahārājñī śrīmatsiṃhāsaneśvarī |
cidagnikuṇḍasambhūtā devakāryasamudyatā ||52||

SHLOKA 53

उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता ।
रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥५३॥

udyadbhānusahasrābhā caturbāhusamanvitā |
rāgasvarūpapāśāḍhyā krodhākārāṅkuśojjvalā ||53||

SHLOKA 54

मनोरूपेक्षुकोदण्डा पञ्चतन्मात्रसायका ।
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला ॥५४॥

manorūpekṣukodaṇḍā pañcatanmātrasāyakā |
nijāruṇaprabhāpūramajjadbrahmāṇḍamaṇḍalā ||54||

SHLOKA 55

चम्पकाशोकपुन्नागसौगन्धिकलसत्कचा ।
कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डिता ॥५५॥

campakāśokapunnāgasaugandhikalasatkacā |
kuruvindamaṇiśreṇīkanatkoṭīramaṇḍitā ||55||

SHLOKA 56

अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता ।
मुखचन्द्रकलङ्काभमृगनाभिविशेषका ॥५६॥

aṣṭamīcandravibhrājadalikasthalaśobhitā |
mukhacandrakalaṅkābhamṛganābhiviśeṣakā ||56||

SHLOKA 57

वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका ।
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना ॥५७॥

vadanasmaramāṅgalyagṛhatoraṇacillikā |
vaktralakṣmīparīvāhacalanmīnābhalocanā ||57||

SHLOKA 58

नवचम्पकपुष्पाभनासादण्डविराजिता ।
ताराकान्तितिरस्कारिनासाभरणभासुरा ॥५८॥

navacampakapuṣpābhanāsādaṇḍavirājitā |
tārākāntitiraskārināsābharaṇabhāsurā ||58||

SHLOKA 59

कदम्बमञ्जरीक्लृप्तकर्णापूरमनोहरा ।
ताटङ्कयुगलीभूततपनोडुपमण्डला ॥५९॥

kadambamañjarīkḷptakarṇāpūramanoharā |
tāṭaṅkayugalībhūtatapanoḍupamaṇḍalā ||59||

SHLOKA 60

पद्मरागशिलादर्शपरिभाविकपोलभूः ।
नवविद्रुमबिम्बश्रीन्यक्कारिदशनच्छदा ॥६०॥

padmarāgaśilādarśaparibhāvikapolabhūḥ |
navavidrumabimbaśrīnyakkāridaśanacchadā ||60||

SHLOKA 61

शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला ।
कर्पूरवीटिकामोदसमाकर्षिदिगन्तरा ॥६१॥

śuddhavidyāṅkurākāradvijapaṅktidvayojjvalā |
karpūravīṭikāmodasamākarṣidigantarā ||61||

SHLOKA 62

निजसंलापमाधुर्यविनिर्भर्त्सितकच्छपी ।
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा ॥६२॥

nijasaṃlāpamādhuryavinirbhartsitakacchapī |
mandasmitaprabhāpūramajjatkāmeśamānasā ||62||

SHLOKA 63

अनाकलितसादृश्यचिबुकश्रीविराजिता ।
कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरा ॥६३॥

anākalitasādṛśyacibukaśrīvirājitā |
kāmeśabaddhamāṅgalyasūtraśobhitakandharā ||63||

SHLOKA 64

कनकाङ्गदकेयूरकमनीयभुजान्विता ।
रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्विता ॥६४॥

kanakāṅgadakeyūrakamanīyabhujānvitā |
ratnagraiveyacintākalolamuktāphalānvitā ||64||

SHLOKA 65

कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी ।
नाभ्यालवालरोमालिलताफलकुचद्वयी ॥६५॥

kāmeśvarapremaratnamaṇipratipaṇastanī |
nābhyālavālaromālilatāphalakucadvayī ||65||

SHLOKA 66

लक्ष्यरोमलताधारतासमुन्नेयमध्यमा ।
स्तनभारदलन्मध्यपट्टबन्धवलित्रया ॥६६॥

lakṣyaromalatādhāratāsamunneyamadhyamā |
stanabhāradalanmadhyapaṭṭabandhavalitrayā ||66||

SHLOKA 67

अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी ।
रत्नकिङ्किणिकारम्यरशनादामभूषिता ॥६७॥

aruṇāruṇakausumbhavastrabhāsvatkaṭītaṭī |
ratnakiṅkiṇikāramyaraśanādāmabhūṣitā ||67||

SHLOKA 68

कामेशज्ञानसौभाग्यमार्दवोरुद्वयान्विता ।
माणिक्यमुकुटाकारजानुद्वयविराजिता ॥६८॥

kāmeśajñānasaubhāgyamārdavorudvayānvitā |
māṇikyamukuṭākārajānudvayavirājitā ||68||

SHLOKA 69

इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिका ।
गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता ॥६९॥

indragopaparikṣiptasmaratūṇābhajaṅghikā |
gūḍhagulphā kūrmapṛṣṭhajayiṣṇuprapadānvitā ||69||

SHLOKA 70

नखदीधितिसंछन्ननमज्जनतमोगुणा ।
पदद्वयप्रभाजालपराकृतसरोरुहा ॥७०॥

nakhadīdhitisaṃchannanamajjanatamoguṇā |
padadvayaprabhājālaparākṛtasaroruhā ||70||

SHLOKA 71

सिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा ।
मरालीमन्दगमना महालावण्यशेवधिः ॥७१॥

siñjānamaṇimañjīramaṇḍitaśrīpadāmbujā |
marālīmandagamanā mahālāvaṇyaśevadhiḥ ||71||

SHLOKA 72

सर्वारुणाऽनवद्याङ्गी सर्वाभरणभूषिता ।
शिवकामेश्वराङ्कस्था शिवा स्वाधीनवल्लभा ॥७२॥

sarvāruṇā'navadyāṅgī sarvābharaṇabhūṣitā |
śivakāmeśvarāṅkasthā śivā svādhīnavallabhā ||72||

श्रीपुर-निवास और भण्डासुर-युद्ध

SHLOKA 73

सुमेरुशृङ्गमध्यस्था श्रीमन्नगरनायिका ।
चिन्तामणिगृहान्तस्था पञ्चब्रह्मासनस्थिता ॥७३॥

sumeruśṛṅgamadhyasthā śrīmannagaranāyikā |
cintāmaṇigṛhāntasthā pañcabrahmāsanasthitā ||73||

SHLOKA 74

महापद्माटवीसंस्था कदम्बवनवासिनी ।
सुधासागरमध्यस्था कामाक्षी कामदायिनी ॥७४॥

mahāpadmāṭavīsaṃsthā kadambavanavāsinī |
sudhāsāgaramadhyasthā kāmākṣī kāmadāyinī ||74||

SHLOKA 75

देवर्षिगणसंघातस्तूयमानात्मवैभवा ।
भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता ॥७५॥

devarṣigaṇasaṃghātastūyamānātmavaibhavā |
bhaṇḍāsuravadhodyuktaśaktisenāsamanvitā ||75||

SHLOKA 76

सम्पत्करीसभारूढसिन्धुरव्रजसेविता ।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता ॥७६॥

sampatkarīsabhārūḍhasindhuravrajasevitā |
aśvārūḍhādhiṣṭhitāśvakoṭikoṭibhirāvṛtā ||76||

SHLOKA 77

चक्रराजरथारूढसर्वायुधपरिष्कृता ।
गेयचक्ररथारूढमन्त्रिणीपरिसेविता ॥७७॥

cakrarājarathārūḍhasarvāyudhapariṣkṛtā |
geyacakrarathārūḍhamantriṇīparisevitā ||77||

SHLOKA 78

किरिचक्ररथारूढदण्डनाथपुरस्कृता ।
ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा ॥७८॥

kiricakrarathārūḍhadaṇḍanāthapuraskṛtā |
jvālāmālinikākṣiptavahniprākāramadhyagā ||78||

SHLOKA 79

भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता ।
नित्यापराक्रमाटोपनिरीक्षणसमुत्सुका ॥७९॥

bhaṇḍasainyavadhodyuktaśaktivikramaharṣitā |
nityāparākramāṭopanirīkṣaṇasamutsukā ||79||

SHLOKA 80

भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दिता ।
मन्त्रिण्यम्बाविरचितविषङ्गवधतोषिता ॥८०॥

bhaṇḍaputravadhodyuktabālāvikramanandita |
mantriṇyambāviracitaviṣaṅgavadhatoṣitā ||80||

SHLOKA 81

विशुक्रप्राणहरणवाराहीवीर्यनन्दिता ।
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा ॥८१॥

viśukraprāṇaharaṇavārāhīvīryananditā |
kāmeśvaramukhālokakalpitaśrīgaṇeśvarā ||81||

SHLOKA 82

महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता ।
भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी ॥८२॥

mahāgaṇeśanirbhinnavighnayantrapraharṣitā |
bhaṇḍāsurendranirmuktaśastrapratyastravarṣiṇī ||82||

SHLOKA 83

कराङ्गुलिनखोत्पन्ननारायणदशाकृतिः ।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका ॥८३॥

karāṅgulinakhotpannanārāyaṇadaśākṛtiḥ |
mahāpāśupatāstrāgninirdagdhāsurasainikā ||83||

SHLOKA 84

कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यका ।
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा ॥८४॥

kāmeśvarāstranirdagdhasabhaṇḍāsuraśūnyakā |
brahmopendramahendrādidevasaṃstutavaibhavā ||84||

मन्त्र-कूट, कुल और कुण्डलिनी

SHLOKA 85

हरनेत्राग्निसंदग्धकामसञ्जीवनौषधिः ।
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा ॥८५॥

haranetrāgnisaṃdagdhakāmasañjīvanauṣadhiḥ |
śrīmadvāgbhavakūṭaikasvarūpamukhapaṅkajā ||85||

SHLOKA 86

कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिणी ।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी ॥८६॥

kaṇṭhādhaḥkaṭiparyantamadhyakūṭasvarūpiṇī |
śaktikūṭaikatāpannakaṭyadhobhāgadhāriṇī ||86||

SHLOKA 87

मूलमन्त्रात्मिका मूलकूटत्रयकलेवरा ।
कुलामृतैकरसिका कुलसंकेतपालिनी ॥८७॥

mūlamantrātmikā mūlakūṭatrayakalevarā |
kulāmṛtaikarasikā kulasaṃketapālinī ||87||

SHLOKA 88

कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
अकुला समयान्तस्था समयाचारतत्परा ॥८८॥

kulāṅganā kulāntasthā kaulinī kulayoginī |
akulā samayāntasthā samayācāratatparā ||88||

SHLOKA 89

मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी ।
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी ॥८९॥

mūlādhāraikanilayā brahmagranthivibhedinī |
maṇipūrāntaruditā viṣṇugranthivibhedinī ||89||

SHLOKA 90

आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी ।
सहस्राराम्बुजारूढा सुधासाराभिवर्षिणी ॥९०॥

ājñācakrāntarālasthā rudragranthivibhedinī |
sahasrārāmbujārūḍhā sudhāsārābhivarṣiṇī ||90||

SHLOKA 91

तडिल्लतासमरुचिः षट्चक्रोपरि संस्थिता ।
महासक्तिः कुण्डलिनी बिसतन्तुतनीयसी ॥९१॥

taḍillatāsamaruciḥ ṣaṭcakropari saṃsthitā |
mahāsaktiḥ kuṇḍalinī bisatantutanīyasī ||91||

भक्तिगम्या, निर्गुणा और महा-नाम

SHLOKA 92

भवानी भावनागम्या भवारण्यकुठारिका ।
भद्रप्रिया भद्रमूर्तिर्भक्तसौभाग्यदायिनी ॥९२॥

bhavānī bhāvanāgamyā bhavāraṇyakuṭhārikā |
bhadrapriyā bhadramūrtirbhaktasaubhāgyadāyinī ||92||

SHLOKA 93

भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शाम्भवी शारदाराध्या शर्वाणी शर्मदायिनी ॥९३॥

bhaktipriyā bhaktigamyā bhaktivaśyā bhayāpahā |
śāmbhavī śāradārādhyā śarvāṇī śarmadāyinī ||93||

SHLOKA 94

शाङ्करी श्रीकरी साध्वी शरच्चन्द्रनिभानना ।
शातोदरी शान्तिमती निराधारा निरञ्जना ॥९४॥

śāṅkarī śrīkarī sādhvī śaraccandranibhānanā |
śātodarī śāntimatī nirādhārā nirañjanā ||94||

SHLOKA 95

निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥९५॥

nirlepā nirmalā nityā nirākārā nirākulā |
nirguṇā niṣkalā śāntā niṣkāmā nirupaplavā ||95||

SHLOKA 96

नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥९६॥

nityamuktā nirvikārā niṣprapañcā nirāśrayā |
nityaśuddhā nityabuddhā niravadyā nirantarā ||96||

SHLOKA 97

निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥९७॥

niṣkāraṇā niṣkalaṅkā nirupādhirnirīśvarā |
nīrāgā rāgamathanī nirmadā madanāśinī ||97||

SHLOKA 98

निश्चिन्ता निरहंकारा निर्मोहा मोहनाशिनी ।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ॥९८॥

niścintā nirahaṃkārā nirmohā mohanāśinī |
nirmamā mamatāhantrī niṣpāpā pāpanāśinī ||98||

SHLOKA 99

निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी ।
निःसंशया संशयघ्नी निर्भवा भवनाशिनी ॥९९॥

niṣkrodhā krodhaśamanī nirlobhā lobhanāśinī |
niḥsaṃśayā saṃśayaghnī nirbhavā bhavanāśinī ||99||

SHLOKA 100

निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥१००॥

nirvikalpā nirābādhā nirbhedā bhedanāśinī |
nirnāśā mṛtyumathanī niṣkriyā niṣparigrahā ||100||

SHLOKA 101

निस्तुला नीलचिकुरा निरपाया निरत्यया ।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥१०१॥

nistulā nīlacikurā nirapāyā niratyayā |
durlabhā durgamā durgā duḥkhahantrī sukhapradā ||101||

SHLOKA 102

दुष्टदूरा दुराचारशमनी दोषवर्जिता ।
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता ॥१०२॥

duṣṭadūrā durācāraśamanī doṣavarjitā |
sarvajñā sāndrakaruṇā samānādhikavarjitā ||102||

SHLOKA 103

सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा ।
सर्वेश्वरी सर्वमयी सर्वमन्त्रस्वरूपिणी ॥१०३॥

sarvaśaktimayī sarvamaṅgalā sadgatipradā |
sarveśvarī sarvamayī sarvamantrasvarūpiṇī ||103||

SHLOKA 104

सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी ।
माहेश्वरी महादेवी महालक्ष्मीर्मृडप्रिया ॥१०४॥

sarvayantrātmikā sarvatantrarūpā manonmanī |
māheśvarī mahādevī mahālakṣmīrmṛḍapriyā ||104||

SHLOKA 105

महारूपा महापूज्या महापातकनाशिनी ।
महामाया महासत्वा महाशक्तिर्महारतिः ॥१०५॥

mahārūpā mahāpūjyā mahāpātakanāśinī |
mahāmāyā mahāsatvā mahāśaktirmahāratiḥ ||105||

SHLOKA 106

महाभोगा महैश्वर्या महावीर्या महाबला ।
महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी ॥१०६॥

mahābhogā mahaiśvaryā mahāvīryā mahābalā |
mahābuddhirmahāsiddhirmahāyogeśvareśvarī ||106||

SHLOKA 107

महातन्त्रा महामन्त्रा महायन्त्रा महासना ।
महायागक्रमाराध्या महाभैरवपूजिता ॥१०७॥

mahātantrā mahāmantrā mahāyantrā mahāsanā |
mahāyāgakramārādhyā mahābhairavapūjitā ||107||

SHLOKA 108

महेश्वरमहाकल्पमहाताण्डवसाक्षिणी ।
महाकामेशमहिषी महात्रिपुरसुन्दरी ॥१०८॥

maheśvaramahākalpamahātāṇḍavasākṣiṇī |
mahākāmeśamahiṣī mahātripurasundarī ||108||

SHLOKA 109

चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी ।
महाचतुःषष्टिकोटियोगिनीगणसेविता ॥१०९॥

catuḥṣaṣṭyupacārāḍhyā catuḥṣaṣṭikalāmayī |
mahācatuḥṣaṣṭikoṭiyoginīgaṇasevitā ||109||

पञ्चकृत्य, अवस्थाएँ और विश्व-लीला

SHLOKA 110

मनुविद्या चन्द्रविद्या चन्द्रमण्डलमध्यगा ।
चारुरूपा चारुहासा चारुचन्द्रकलाधरा ॥११०॥

manuvidyā candravidyā candramaṇḍalamadhyagā |
cārurūpā cāruhāsā cārucandrakalādharā ||110||

SHLOKA 111

चराचरजगन्नाथा चक्रराजनिकेतना ।
पार्वती पद्मनयना पद्मरागसमप्रभा ॥१११॥

carācarajagannāthā cakrarājaniketanā |
pārvatī padmanayanā padmarāgasamaprabhā ||111||

SHLOKA 112

पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी ।
चिन्मयी परमानन्दा विज्ञानघनरूपिणी ॥११२॥

pañcapretāsanāsīnā pañcabrahmasvarūpiṇī |
cinmayī paramānandā vijñānaghanarūpiṇī ||112||

SHLOKA 113

ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता ।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥११३॥

dhyānadhyātṛdhyeyarūpā dharmādharmavivarjitā |
viśvarūpā jāgariṇī svapantī taijasātmikā ||113||

SHLOKA 114

सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता ।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ॥११४॥

suptā prājñātmikā turyā sarvāvasthāvivarjitā |
sṛṣṭikartrī brahmarūpā goptrī govindarūpiṇī ||114||

SHLOKA 115

संहारिणी रुद्ररूपा तिरोधानकरीश्वरी ।
सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा ॥११५॥

saṃhāriṇī rudrarūpā tirodhānakarīśvarī |
sadāśivā'nugrahadā pañcakṛtyaparāyaṇā ||115||

SHLOKA 116

भानुमण्डलमध्यस्था भैरवी भगमालिनी ।
पद्मासना भगवती पद्मनाभसहोदरी ॥११६॥

bhānumaṇḍalamadhyasthā bhairavī bhagamālinī |
padmāsanā bhagavatī padmanābhasahodarī ||116||

SHLOKA 117

उन्मेषनिमिषोत्पन्नविपन्नभुवनावली ।
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ॥११७॥

unmeṣanimiṣotpannavipannabhuvanāvalī |
sahasraśīrṣavadanā sahasrākṣī sahasrapāt ||117||

SHLOKA 118

आब्रह्मकीटजननी वर्णाश्रमविधायिनी ।
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा ॥११८॥

ābrahmakīṭajananī varṇāśramavidhāyinī |
nijājñārūpanigamā puṇyāpuṇyaphalapradā ||118||

SHLOKA 119

श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका ।
सकलागमसंदोहशुक्तिसंपुटमौक्तिका ॥११९॥

śrutisīmantasindūrīkṛtapādābjadhūlikā |
sakalāgamasaṃdohaśuktisaṃpuṭamauktikā ||119||

SHLOKA 120

पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी ।
अम्बिकाऽनादिनिधना हरिब्रह्मेन्द्रसेविता ॥१२०॥

puruṣārthapradā pūrṇā bhoginī bhuvaneśvarī |
ambikā'nādinidhanā haribrahmendrasevitā ||120||

SHLOKA 121

नारायणी नादरूपा नामरूपविवर्जिता ।
ह्रींकारी ह्रीमती हृद्या हेयोपादेयवर्जिता ॥१२१॥

nārāyaṇī nādarūpā nāmarūpavivarjitā |
hrīṃkārī hrīmatī hṛdyā heyopādeyavarjitā ||121||

SHLOKA 122

राजराजार्चिता राज्ञी रम्या राजीवलोचना ।
रञ्जनी रमणी रस्या रणत्किङ्किणिमेखला ॥१२२॥

rājarājārcitā rājñī ramyā rājīvalocanā |
rañjanī ramaṇī rasyā raṇatkiṅkiṇimekhalā ||122||

SHLOKA 123

रमा राकेन्दुवदना रतिरूपा रतिप्रिया ।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ॥१२३॥

ramā rākenduvadanā ratirūpā ratipriyā |
rakṣākarī rākṣasaghnī rāmā ramaṇalampaṭā ||123||

SHLOKA 124

काम्या कामकलारूपा कदम्बकुसुमप्रिया ।
कल्याणी जगतीकन्दा करुणारससागरा ॥१२४॥

kāmyā kāmakalārūpā kadambakusumapriyā |
kalyāṇī jagatīkandā karuṇārasasāgarā ||124||

SHLOKA 125

कलावती कलालापा कान्ता कादम्बरीप्रिया ।
वरदा वामनयना वारुणीमदविह्वला ॥१२५॥

kalāvatī kalālāpā kāntā kādambarīpriyā |
varadā vāmanayanā vāruṇīmadavihvalā ||125||

SHLOKA 126

विश्वाधिका वेदवेद्या विन्ध्याचलनिवासिनी ।
विधात्री वेदजननी विष्णुमाया विलासिनी ॥१२६॥

viśvādhikā vedavedyā vindhyācalanivāsinī |
vidhātrī vedajananī viṣṇumāyā vilāsinī ||126||

SHLOKA 127

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी ।
क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता ॥१२७॥

kṣetrasvarūpā kṣetreśī kṣetrakṣetrajñapālinī |
kṣayavṛddhivinirmuktā kṣetrapālasamarcitā ||127||

SHLOKA 128

विजया विमला वन्द्या वन्दारुजनवत्सला ।
वाग्वादिनी वामकेशी वह्निमण्डलवासिनी ॥१२८॥

vijayā vimalā vandyā vandārujanavatsalā |
vāgvādinī vāmakeśī vahnimaṇḍalavāsinī ||128||

SHLOKA 129

भक्तिमत्कल्पलतिका पशुपाशविमोचिनी ।
संहृताशेषपाखण्डा सदाचारप्रवर्तिका ॥१२९॥

bhaktimatkalpalatikā paśupāśavimocinī |
saṃhṛtāśeṣapākhaṇḍā sadācārapravartikā ||129||

SHLOKA 130

तापत्रयाग्निसंतप्तसमाह्लादनचन्द्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोपहा ॥१३०॥

tāpatrayāgnisaṃtaptasamāhlādanacandrikā |
taruṇī tāpasārādhyā tanumadhyā tamopahā ||130||

चिति, वाणी और शिवप्रिया

SHLOKA 131

चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी ।
स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसंततिः ॥१३१॥

citistatpadalakṣyārthā cidekarasarūpiṇī |
svātmānandalavībhūtabrahmādyānandasaṃtatiḥ ||131||

SHLOKA 132

परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता ।
मध्यमा वैखरीरूपा भक्तमानसहंसिका ॥१३२॥

parā pratyakcitīrūpā paśyantī paradevatā |
madhyamā vaikharīrūpā bhaktamānasahaṃsikā ||132||

SHLOKA 133

कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता ।
शृङ्गाररससंपूर्णा जया जालन्धरस्थिता ॥१३३॥

kāmeśvaraprāṇanāḍī kṛtajñā kāmapūjitā |
śṛṅgārarasasaṃpūrṇā jayā jālandharasthitā ||133||

SHLOKA 134

ओड्याणपीठनिलया बिन्दुमण्डलवासिनी ।
रहोयागक्रमाराध्या रहस्तर्पणतर्पिता ॥१३४॥

oḍyāṇapīṭhanilayā bindumaṇḍalavāsinī |
rahoyāgakramārādhyā rahastarpaṇatarpitā ||134||

SHLOKA 135

सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता ।
षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूरिता ॥१३५॥

sadyaḥprasādinī viśvasākṣiṇī sākṣivarjitā |
ṣaḍaṅgadevatāyuktā ṣāḍguṇyaparipūritā ||135||

SHLOKA 136

नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी ।
नित्याषोडशिकारूपा श्रीकण्ठार्धशरीरिणी ॥१३६॥

nityaklinnā nirupamā nirvāṇasukhadāyinī |
nityāṣoḍaśikārūpā śrīkaṇṭhārdhaśarīriṇī ||136||

SHLOKA 137

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी ॥१३७॥

prabhāvatī prabhārūpā prasiddhā parameśvarī |
mūlaprakṛtiravyaktā vyaktāvyaktasvarūpiṇī ||137||

SHLOKA 138

व्यापिनी विविधाकारा विद्याविद्यास्वरूपिणी ।
महाकामेशनयनकुमुदाह्लादकौमुदी ॥१३८॥

vyāpinī vividhākārā vidyāvidyāsvarūpiṇī |
mahākāmeśanayanakumudāhlādakaumudī ||138||

SHLOKA 139

भक्तहार्दतमोभेदभानुमद्भानुसंततिः ।
शिवदूती शिवाराध्या शिवमूर्तिः शिवंकरी ॥१३९॥

bhaktahārdatamobhedabhānumadbhānusaṃtatiḥ |
śivadūtī śivārādhyā śivamūrtiḥ śivaṃkarī ||139||

SHLOKA 140

शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
अप्रमेया स्वप्रकाशाऽमनोवाचामगोचरा ॥१४०॥

śivapriyā śivaparā śiṣṭeṣṭā śiṣṭapūjitā |
aprameyā svaprakāśā'manovācāmagocarā ||140||

SHLOKA 141

चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका ।
गायत्री व्याहृतिः संध्या द्विजवृन्दनिषेविता ॥१४१॥

cicchaktiścetanārūpā jaḍaśaktirjaḍātmikā |
gāyatrī vyāhṛtiḥ saṃdhyā dvijavṛndaniṣevitā ||141||

SHLOKA 142

तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता ।
निःसीममहिमा नित्ययौवना मदशालिनी ॥१४२॥

tattvāsanā tattvamayī pañcakośāntarasthitā |
niḥsīmamahimā nityayauvanā madaśālinī ||142||

SHLOKA 143

मदाघूर्णितरक्ताक्षी मदपाटलगण्डभूः ।
चन्दनद्रवदिग्धाङ्गा चाम्पेयकुसुमप्रिया ॥१४३॥

madāghūrṇitaraktākṣī madapāṭalagaṇḍabhūḥ |
candanadravadigdhāṅgā cāmpeyakusumapriyā ||143||

SHLOKA 144

कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुण्डालया कौलमार्गतत्परसेविता ॥१४४॥

kuśalā komalākārā kurukullā kuleśvarī |
kulakuṇḍālayā kaulamārgatatparasevitā ||144||

SHLOKA 145

कुमारगणनाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः ।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्ननाशिनी ॥१४५॥

kumāragaṇanāthāmbā tuṣṭiḥ puṣṭirmatirdhṛtiḥ |
śāntiḥ svastimatī kāntirnandinī vighnanāśinī ||145||

SHLOKA 146

तेजोवती त्रिनयना लोलाक्षी कामरूपिणी ।
मालिनी हंसिनी माता मलयाचलवासिनी ॥१४६॥

tejovatī trinayanā lolākṣī kāmarūpiṇī |
mālinī haṃsinī mātā malayācalavāsinī ||146||

SHLOKA 147

सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका ।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ॥१४७॥

sumukhī nalinī subhrūḥ śobhanā suranāyikā |
kālakaṇṭhī kāntimatī kṣobhiṇī sūkṣmarūpiṇī ||147||

SHLOKA 148

वज्रेश्वरी वामदेवी वयोवस्थाविवर्जिता ।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥१४८॥

vajreśvarī vāmadevī vayovasthāvivarjitā |
siddheśvarī siddhavidyā siddhamātā yaśasvinī ||148||

सात योगिनी-रूप

SHLOKA 149

विशुद्धिचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना ।
खट्वाङ्गादिप्रहरणा वदनैकसमन्विता ॥१४९॥

viśuddhicakranilayā''raktavarṇā trilocanā |
khaṭvāṅgādipraharaṇā vadanaikasamanvitā ||149||

SHLOKA 150

पायसान्नप्रिया त्वक्स्था पशुलोकभयंकरी ।
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी ॥१५०॥

pāyasānnapriyā tvaksthā paśulokabhayaṃkarī |
amṛtādimahāśaktisaṃvṛtā ḍākinīśvarī ||150||

SHLOKA 151

अनाहताब्जनिलया श्यामाभा वदनद्वया ।
दंष्ट्रोज्वलाक्षमालादिधरा रुधिरसंस्थिता ॥१५१॥

anāhatābjanilayā śyāmābhā vadanadvayā |
daṃṣṭrojvalākṣamālādidharā rudhirasaṃsthitā ||151||

SHLOKA 152

कालरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया ।
महावीरेन्द्रवरदा राकिण्यम्बास्वरूपिणी ॥१५२॥

kālarātryādiśaktyaughavṛtā snigdhaudanapriyā |
mahāvīrendravaradā rākiṇyambāsvarūpiṇī ||152||

SHLOKA 153

मणिपूराब्जनिलया वदनत्रयसंयुता ।
वज्रादिकायुधोपेता डामर्यादिभिरावृता ॥१५३॥

maṇipūrābjanilayā vadanatrayasaṃyutā |
vajrādikāyudhopetā ḍāmaryādibhirāvṛtā ||153||

SHLOKA 154

रक्तवर्णा मांसनिष्ठा गुडान्नप्रीतमानसा ।
समस्तभक्तसुखदा लाकिण्यम्बास्वरूपिणी ॥१५४॥

raktavarṇā māṃsaniṣṭhā guḍānnaprītamānasā |
samastabhaktasukhadā lākiṇyambāsvarūpiṇī ||154||

SHLOKA 155

स्वाधिष्ठानाम्बुजगता चतुर्वक्त्रमनोहरा ।
शूलाद्यायुधसंपन्ना पीतवर्णातिगर्विता ॥१५५॥

svādhiṣṭhānāmbujagatā caturvaktramanoharā |
śūlādyāyudhasaṃpannā pītavarṇātigarvitā ||155||

SHLOKA 156

मेदोनिष्ठा मधुप्रीता बन्धिन्यादिसमन्विता ।
दध्यन्नासक्तहृदया काकिनीरूपधारिणी ॥१५६॥

medoniṣṭhā madhuprītā bandhinyādisamanvitā |
dadhyannāsaktahṛdayā kākinīrūpadhāriṇī ||156||

SHLOKA 157

मूलाधाराम्बुजारूढा पञ्चवक्त्राऽस्थिसंस्थिता ।
अङ्कुशादिप्रहरणा वरदादिनिषेविता ॥१५७॥

mūlādhārāmbujārūḍhā pañcavaktrā'sthisaṃsthitā |
aṅkuśādipraharaṇā varadādiniṣevitā ||157||

SHLOKA 158

मुद्गौदनासक्तचित्ता साकिन्यम्बास्वरूपिणी ।
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना ॥१५८॥

mudgaudanāsaktacittā sākinyambāsvarūpiṇī |
ājñācakrābjanilayā śuklavarṇā ṣaḍānanā ||158||

SHLOKA 159

मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता ।
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी ॥१५९॥

majjāsaṃsthā haṃsavatī mukhyaśaktisamanvitā |
haridrānnaikarasikā hākinīrūpadhāriṇī ||159||

SHLOKA 160

सहस्रदलपद्मस्था सर्ववर्णोपशोभिता ।
सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी ॥१६०॥

sahasradalapadmasthā sarvavarṇopaśobhitā |
sarvāyudhadharā śuklasaṃsthitā sarvatomukhī ||160||

SHLOKA 161

सर्वौदनप्रीतचित्ता याकिन्यम्बास्वरूपिणी ।
स्वाहा स्वधा मतिर्मेधा श्रुतिस्मृतिरनुत्तमा ॥१६१॥

sarvaudanaprītacittā yākinyambāsvarūpiṇī |
svāhā svadhā matirmedhā śrutismṛtiranuttamā ||161||

श्रीविद्या, राजराजेश्वरी और करुणा

SHLOKA 162

पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना ।
पुलोमजार्चिता बन्धमोचनी बन्धुरालका ॥१६२॥

puṇyakīrtiḥ puṇyalabhyā puṇyaśravaṇakīrtanā |
pulomajārcitā bandhamocanī bandhurālakā ||162||

SHLOKA 163

विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः ।
सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी ॥१६३॥

vimarśarūpiṇī vidyā viyadādijagatprasūḥ |
sarvavyādhipraśamanī sarvamṛtyunivāriṇī ||163||

SHLOKA 164

अग्रगण्याऽचिन्त्यरूपा कलिकल्मषनाशिनी ।
कात्यायनी कालहन्त्री कमलाक्षनिषेविता ॥१६४॥

agragaṇyā'cintyarūpā kalikalmaṣanāśinī |
kātyāyanī kālahantrī kamalākṣaniṣevitā ||164||

SHLOKA 165

ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥१६५॥

tāmbūlapūritamukhī dāḍimīkusumaprabhā |
mṛgākṣī mohinī mukhyā mṛḍānī mitrarūpiṇī ||165||

SHLOKA 166

नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी ।
मैत्र्यादिवासनालभ्या महाप्रलयसाक्षिणी ॥१६६॥

nityatṛptā bhaktanidhirniyantrī nikhileśvarī |
maitryādivāsanālabhyā mahāpralayasākṣiṇī ||166||

SHLOKA 167

पराशक्तिः परानिष्ठा प्रज्ञानघनरूपिणी ।
माध्वीपानालसा मत्ता मातृकावर्णरूपिणी ॥१६७॥

parāśaktiḥ parāniṣṭhā prajñānaghanarūpiṇī |
mādhvīpānālasā mattā mātṛkāvarṇarūpiṇī ||167||

SHLOKA 168

महाकैलासनिलया मृणालमृदुदोर्लता ।
महनीया दयामूर्तिर्महासाम्राज्यशालिनी ॥१६८॥

mahākailāsanilayā mṛṇālamṛdudorlatā |
mahanīyā dayāmūrtirmahāsāmrājyaśālinī ||168||

SHLOKA 169

आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥१६९॥

ātmavidyā mahāvidyā śrīvidyā kāmasevitā |
śrīṣoḍaśākṣarīvidyā trikūṭā kāmakoṭikā ||169||

SHLOKA 170

कटाक्षकिंकरीभूतकमलाकोटिसेविता ।
शिरस्थिता चन्द्रनिभा भालस्थेन्द्रधनुःप्रभा ॥१७०॥

kaṭākṣakiṃkarībhūtakamalākoṭisevitā |
śirasthitā candranibhā bhālasthendradhanuḥprabhā ||170||

SHLOKA 171

हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका ।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी ॥१७१॥

hṛdayasthā raviprakhyā trikoṇāntaradīpikā |
dākṣāyaṇī daityahantrī dakṣayajñavināśinī ||171||

SHLOKA 172

दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः ॥१७२॥

darāndolitadīrghākṣī darahāsojjvalanmukhī |
gurumūrtirguṇanidhirgomātā guhajanmabhūḥ ||172||

SHLOKA 173

देवेशी दण्डनीतिस्था दहराकाशरूपिणी ।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता ॥१७३॥

deveśī daṇḍanītisthā daharākāśarūpiṇī |
pratipanmukhyarākāntatithimaṇḍalapūjitā ||173||

SHLOKA 174

कलात्मिका कलानाथा काव्यालापविनोदिनी ।
सचामररमावाणीसव्यदक्षिणसेविता ॥१७४॥

kalātmikā kalānāthā kāvyālāpavinodinī |
sacāmararamāvāṇīsavyadakṣiṇasevitā ||174||

SHLOKA 175

आदिशक्तिरमेयात्मा परमा पावनाकृतिः ।
अनेककोटिब्रह्माण्डजननी दिव्यविग्रहा ॥१७५॥

ādiśaktirameyātmā paramā pāvanākṛtiḥ |
anekakoṭibrahmāṇḍajananī divyavigrahā ||175||

SHLOKA 176

क्लींकारी केवला गुह्या कैवल्यपददायिनी ।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥१७६॥

klīṃkārī kevalā guhyā kaivalyapadadāyinī |
tripurā trijagadvandyā trimūrtistridaśeśvarī ||176||

SHLOKA 177

त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता ।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता ॥१७७॥

tryakṣarī divyagandhāḍhyā sindūratilakāñcitā |
umā śailendratanayā gaurī gandharvasevitā ||177||

SHLOKA 178

विश्वगर्भा स्वर्णगर्भाऽवरदा वागधीश्वरी ।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ॥१७८॥

viśvagarbhā svarṇagarbhā'varadā vāgadhīśvarī |
dhyānagamyā'paricchedyā jñānadā jñānavigrahā ||178||

SHLOKA 179

सर्ववेदान्तसंवेद्या सत्यानन्दस्वरूपिणी ।
लोपामुद्रार्चिता लीलाकॢप्तब्रह्माण्डमण्डला ॥१७९॥

sarvavedāntasaṃvedyā satyānandasvarūpiṇī |
lopāmudrārcitā līlākḷptabrahmāṇḍamaṇḍalā ||179||

SHLOKA 180

अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
योगिनी योगदा योग्या योगानन्दयुगंधरा ॥१८०॥

adṛśyā dṛśyarahitā vijñātrī vedyavarjitā |
yoginī yogadā yogyā yogānandayugaṃdharā ||180||

SHLOKA 181

इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ॥१८१॥

icchāśaktijñānaśaktikriyāśaktisvarūpiṇī |
sarvādhārā supratiṣṭhā sadasadrūpadhāriṇī ||181||

SHLOKA 182

अष्टमूर्तिरजा जैत्री लोकयात्राविधायिनी ।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥१८२॥

aṣṭamūrtirajā jaitrī lokayātrāvidhāyinī |
ekākinī bhūmarūpā nirdvaitā dvaitavarjitā ||182||

SHLOKA 183

अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी ।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥१८३॥

annadā vasudā vṛddhā brahmātmaikyasvarūpiṇī |
bṛhatī brāhmaṇī brāhmī brahmānandā balipriyā ||183||

SHLOKA 184

भाषारूपा बृहत्सेना भावाभावविवर्जिता ।
सुखाराध्या शुभकरी शोभना सुलभागतिः ॥१८४॥

bhāṣārūpā bṛhatsenā bhāvābhāvavivarjitā |
sukhārādhyā śubhakarī śobhanā sulabhāgatiḥ ||184||

SHLOKA 185

राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ।
राजत्कृपा राजपीठनिवेशितनिजाश्रिता ॥१८५॥

rājarājeśvarī rājyadāyinī rājyavallabhā |
rājatkṛpā rājapīṭhaniveśitanijāśritā ||185||

SHLOKA 186

राज्यलक्ष्मीः कोशनाथा चतुरङ्गबलेश्वरी ।
साम्राज्यदायिनी सत्यसंधा सागरमेखला ॥१८६॥

rājyalakṣmīḥ kośanāthā caturaṅgabaleśvarī |
sāmrājyadāyinī satyasaṃdhā sāgaramekhalā ||186||

SHLOKA 187

दीक्षिता दैत्यशमनी सर्वलोकवशंकरी ।
सर्वार्थदात्री सावित्री सच्चिदानन्दरूपिणी ॥१८७॥

dīkṣitā daityaśamanī sarvalokavaśaṃkarī |
sarvārthadātrī sāvitrī saccidānandarūpiṇī ||187||

SHLOKA 188

देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी ॥१८८॥

deśakālāparicchinnā sarvagā sarvamohinī |
sarasvatī śāstramayī guhāmbā guhyarūpiṇī ||188||

SHLOKA 189

सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता ।
संप्रदायेश्वरी साध्वी गुरुमण्डलरूपिणी ॥१८९॥

sarvopādhivinirmuktā sadāśivapativratā |
saṃpradāyeśvarī sādhvī gurumaṇḍalarūpiṇī ||189||

SHLOKA 190

कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ॥१९०॥

kulottīrṇā bhagārādhyā māyā madhumatī mahī |
gaṇāmbā guhyakārādhyā komalāṅgī gurupriyā ||190||

SHLOKA 191

स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्तिरूपिणी ।
सनकादिसमाराध्या शिवज्ञानप्रदायिनी ॥१९१॥

svatantrā sarvatantreśī dakṣiṇāmūrtirūpiṇī |
sanakādisamārādhyā śivajñānapradāyinī ||191||

SHLOKA 192

चित्कलानन्दकलिका प्रेमरूपा प्रियंकरी ।
नामपारायणप्रीता नन्दिविद्या नटेश्वरी ॥१९२॥

citkalānandakalikā premarūpā priyaṃkarī |
nāmapārāyaṇaprītā nandividyā naṭeśvarī ||192||

SHLOKA 193

मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।
लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ॥१९३॥

mithyājagadadhiṣṭhānā muktidā muktirūpiṇī |
lāsyapriyā layakarī lajjā rambhādivanditā ||193||

SHLOKA 194

भवदावसुधावृष्टिः पापारण्यदवानला ।
दौर्भाग्यतूलवातूला जराध्वान्तरविप्रभा ॥१९४॥

bhavadāvasudhāvṛṣṭiḥ pāpāraṇyadavānalā |
daurbhāgyatūlavātūlā jarādhvāntaraviprabhā ||194||

SHLOKA 195

भाग्याब्धिचन्द्रिका भक्तचित्तकेकिघनाघना ।
रोगपर्वतदम्भोलिर्मृत्युदारुकुठारिका ॥१९५॥

bhāgyābdhicandrikā bhaktacittakekighanāghanā |
rogaparvatadambholirmṛtyudārukuṭhārikā ||195||

SHLOKA 196

महेश्वरी महाकाली महाग्रासा महाशना ।
अपर्णा चण्डिका चण्डमुण्डासुरनिषूदनी ॥१९६॥

maheśvarī mahākālī mahāgrāsā mahāśanā |
aparṇā caṇḍikā caṇḍamuṇḍāsuraniṣūdanī ||196||

SHLOKA 197

क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ॥१९७॥

kṣarākṣarātmikā sarvalokeśī viśvadhāriṇī |
trivargadātrī subhagā tryambakā triguṇātmikā ||197||

पञ्चप्रेतमञ्च, श्रीचक्र और ललिताम्बिका

SHLOKA 198

स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥१९८॥

svargāpavargadā śuddhā japāpuṣpanibhākṛtiḥ |
ojovatī dyutidharā yajñarūpā priyavratā ||198||

SHLOKA 199

दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया ।
महती मेरुनिलया मन्दारकुसुमप्रिया ॥१९९॥

durārādhyā durādharṣā pāṭalīkusumapriyā |
mahatī merunilayā mandārakusumapriyā ||199||

SHLOKA 200

वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ॥२००॥

vīrārādhyā virāḍrūpā virajā viśvatomukhī |
pratyagrūpā parākāśā prāṇadā prāṇarūpiṇī ||200||

SHLOKA 201

मार्तण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥२०१॥

mārtaṇḍabhairavārādhyā mantriṇīnyastarājyadhūḥ |
tripureśī jayatsenā nistraiguṇyā parāparā ||201||

SHLOKA 202

सत्यज्ञानानन्दरूपा सामरस्यपरायणा ।
कपर्दिनी कलामाला कामधुक्कामरूपिणी ॥२०२॥

satyajñānānandarūpā sāmarasyaparāyaṇā |
kapardinī kalāmālā kāmadhukkāmarūpiṇī ||202||

SHLOKA 203

कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥२०३॥

kalānidhiḥ kāvyakalā rasajñā rasaśevadhiḥ |
puṣṭā purātanā pūjyā puṣkarā puṣkarekṣaṇā ||203||

SHLOKA 204

परंज्योतिः परंधाम परमाणुः परात्परा ।
पाशहस्ता पाशहन्त्री परमन्त्रविभेदिनी ॥२०४॥

paraṃjyotiḥ paraṃdhāma paramāṇuḥ parātparā |
pāśahastā pāśahantrī paramantravibhedinī ||204||

SHLOKA 205

मूर्तामूर्ता नित्यतृप्ता मुनिमानसहंसिका ।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती ॥२०५॥

mūrtāmūrtā nityatṛptā munimānasahaṃsikā |
satyavratā satyarūpā sarvāntaryāminī satī ||205||

SHLOKA 206

ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ॥२०६॥

brahmāṇī brahmajananī bahurūpā budhārcitā |
prasavitrī pracaṇḍā''jñā pratiṣṭhā prakaṭākṛtiḥ ||206||

SHLOKA 207

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी ।
विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः ॥२०७॥

prāṇeśvarī prāṇadātrī pañcāśatpīṭharūpiṇī |
viśṛṅkhalā viviktasthā vīramātā viyatprasūḥ ||207||

SHLOKA 208

मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी ।
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी ॥२०८॥

mukundā muktinilayā mūlavigraharūpiṇī |
bhāvajñā bhavarogaghnī bhavacakrapravartinī ||208||

SHLOKA 209

छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी ।
उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ॥२०९॥

chandaḥsārā śāstrasārā mantrasārā talodarī |
udārakīrtiruddāmavaibhavā varṇarūpiṇī ||209||

SHLOKA 210

जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी ।
सर्वोपनिषदुद्घुष्टा शान्त्यतीता कलात्मिका ॥२१०॥

janmamṛtyujarātaptajanaviśrāntidāyinī |
sarvopaniṣadudghuṣṭā śāntyatītā kalātmikā ||210||

SHLOKA 211

गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।
कल्पनारहिता काष्ठाऽकान्ता कान्तार्धविग्रहा ॥२११॥

gambhīrā gaganāntasthā garvitā gānalolupā |
kalpanārahitā kāṣṭhā'kāntā kāntārdhavigrahā ||211||

SHLOKA 212

कार्यकारणनिर्मुक्ता कामकेलितरङ्गिता ।
कनत्कनकताटङ्का लीलाविग्रहधारिणी ॥२१२॥

kāryakāraṇanirmuktā kāmakelitaraṅgitā |
kanatkanakatāṭaṅkā līlāvigrahadhāriṇī ||212||

SHLOKA 213

अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी ।
अन्तर्मुखसमाराध्या बहिर्मुखसुदुर्लभा ॥२१३॥

ajā kṣayavinirmuktā mugdhā kṣipraprasādinī |
antarmukhasamārādhyā bahirmukhasudurlabhā ||213||

SHLOKA 214

त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी ।
निरामया निरालम्बा स्वात्मारामा सुधास्रुतिः ॥२१४॥

trayī trivarganilayā tristhā tripuramālinī |
nirāmayā nirālambā svātmārāmā sudhāsrutiḥ ||214||

SHLOKA 215

संसारपङ्कनिर्मग्नसमुद्धरणपण्डिता ।
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी ॥२१५॥

saṃsārapaṅkanirmagnasamuddharaṇapaṇḍitā |
yajñapriyā yajñakartrī yajamānasvarūpiṇī ||215||

SHLOKA 216

धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी ।
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी ॥२१६॥

dharmādhārā dhanādhyakṣā dhanadhānyavivardhinī |
viprapriyā viprarūpā viśvabhramaṇakāriṇī ||216||

SHLOKA 217

विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ॥२१७॥

viśvagrāsā vidrumābhā vaiṣṇavī viṣṇurūpiṇī |
ayoniryoninilayā kūṭasthā kularūpiṇī ||217||

SHLOKA 218

वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी ।
विज्ञानकलना कल्या विदग्धा बैन्दवासनी ॥२१८॥

vīragoṣṭhīpriyā vīrā naiṣkarmyā nādarūpiṇī |
vijñānakalanā kalyā vidagdhā baindavāsanī ||218||

SHLOKA 219

तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी ।
सामगानप्रिया सौम्या सदाशिवकुटुम्बिनी ॥२१९॥

tattvādhikā tattvamayī tattvamarthasvarūpiṇī |
sāmagānapriyā saumyā sadāśivakuṭumbinī ||219||

SHLOKA 220

सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी ।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥२२०॥

savyāpasavyamārgasthā sarvāpadvinivāriṇī |
svasthā svabhāvamadhurā dhīrā dhīrasamarcitā ||220||

SHLOKA 221

चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया ।
सदोदिता सदातुष्टा तरुणादित्यपाटला ॥२२१॥

caitanyārghyasamārādhyā caitanyakusumapriyā |
sadoditā sadātuṣṭā taruṇādityapāṭalā ||221||

SHLOKA 222

दक्षिणादक्षिणाराध्या दरस्मेरमुखाम्बुजा ।
कौलिनीकेवलाऽनर्घ्यकैवल्यफलदायिनी ॥२२२॥

dakṣiṇādakṣiṇārādhyā darasmeramukhāmbujā |
kaulinīkevalā'narghyakaivalyaphaladāyinī ||222||

SHLOKA 223

स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा ।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥२२३॥

stotrapriyā stutimatī śrutisaṃstutavaibhavā |
manasvinī mānavatī maheśī maṅgalākṛtiḥ ||223||

SHLOKA 224

विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।
प्रगल्भा परमोदारा परामोदा मनोमयी ॥२२४॥

viśvamātā jagaddhātrī viśālākṣī virāgiṇī |
pragalbhā paramodārā parāmodā manomayī ||224||

SHLOKA 225

व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी ॥२२५॥

vyomakeśī vimānasthā vajriṇī vāmakeśvarī |
pañcayajñapriyā pañcapretamañcādhiśāyinī ||225||

SHLOKA 226

पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी ।
शाश्वती शाश्वतैश्वर्या शर्मदा शंभुमोहिनी ॥२२६॥

pañcamī pañcabhūteśī pañcasaṃkhyopacāriṇī |
śāśvatī śāśvataiśvaryā śarmadā śaṃbhumohinī ||226||

SHLOKA 227

धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।
लोकातीता गुणातीता सर्वातीता शमाश्रिता ॥२२७॥

dharā dharasutā dhanyā dharmiṇī dharmavardhinī |
lokātītā guṇātītā sarvātītā śamāśritā ||227||

SHLOKA 228

बन्धूककुसुमप्रख्या बाला लीलाविनोदिनी ।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥२२८॥

bandhūkakusumaprakhyā bālā līlāvinodinī |
sumaṅgalī sukhakarī suveṣāḍhyā suvāsinī ||228||

SHLOKA 229

सुवासिन्यर्चनप्रीताऽऽशोभना शुद्धमानसा ।
बिन्दुतर्पणसंतुष्टा पूर्वजा त्रिपुराम्बिका ॥२२९॥

suvāsinyarcanaprītā"śobhanā śuddhamānasā |
bindutarpaṇasaṃtuṣṭā pūrvajā tripurāmbikā ||229||

SHLOKA 230

दशमुद्रासमाराध्या त्रिपुराश्रीवशंकरी ।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी ॥२३०॥

daśamudrāsamārādhyā tripurāśrīvaśaṃkarī |
jñānamudrā jñānagamyā jñānajñeyasvarūpiṇī ||230||

SHLOKA 231

योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।
अनघाऽद्भुतचारित्रा वाञ्छितार्थप्रदायिनी ॥२३१॥

yonimudrā trikhaṇḍeśī triguṇāmbā trikoṇagā |
anaghā'dbhutacāritrā vāñchitārthapradāyinī ||231||

SHLOKA 232

अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी ।
अव्याजकरुणामूर्तिरज्ञानध्वान्तदीपिका ॥२३२॥

abhyāsātiśayajñātā ṣaḍadhvātītarūpiṇī |
avyājakaruṇāmūrtirajñānadhvāntadīpikā ||232||

SHLOKA 233

आबालगोपविदिता सर्वानुल्लङ्घ्यशासना ।
श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी ॥२३३॥

ābālagopaviditā sarvānullaṅghyaśāsanā |
śrīcakrarājanilayā śrīmattripurasundarī ||233||

SHLOKA 234

श्रीशिवा शिवशक्त्यैक्यरूपिणी ललिताम्बिका ।
इत्येवं नामसाहस्रं कथितं ते घटोद्भव ॥२३४॥

śrīśivā śivaśaktyaikyarūpiṇī lalitāmbikā |
ityevaṃ nāmasāhasraṃ kathitaṃ te ghaṭodbhava ||234||

फलश्रुति: महिमा, पुण्य और पाठ के अवसर

SHLOKA 235

रहस्यानां रहस्यं च ललिताप्रीतिदायकम् ।
अनेन सदृशं स्तोत्रं न भूतं न भविष्यति ॥२३५॥

rahasyānāṃ rahasyaṃ ca lalitāprītidāyakam |
anena sadṛśaṃ stotraṃ na bhūtaṃ na bhaviṣyati ||235||

SHLOKA 236

सर्वरोगप्रशमनं सर्वसंपत्प्रवर्धनम् ।
सर्वापमृत्युशमनं कालमृत्युनिवारणम् ॥२३६॥

sarvarogapraśamanaṃ sarvasaṃpatpravardhanam |
sarvāpamṛtyuśamanaṃ kālamṛtyunivāraṇam ||236||

SHLOKA 237

सर्वज्वरार्तिशमनं दीर्घायुष्यप्रदायकम् ।
पुत्रप्रदमपुत्राणां पुरुषार्थप्रदायकम् ॥२३७॥

sarvajvarārtiśamanaṃ dīrghāyuṣyapradāyakam |
putrapradamaputrāṇāṃ puruṣārthapradāyakam ||237||

SHLOKA 238

इदं विशेषाच्छ्रीदेव्याः स्तोत्रं प्रीतिविधायकम् ।
जपेन्नित्यं प्रयत्नेन ललितोपास्तितत्परः ॥२३८॥

idaṃ viśeṣācchrīdevyāḥ stotraṃ prītividhāyakam |
japennityaṃ prayatnena lalitopāstitatparaḥ ||238||

SHLOKA 239

प्रातः स्नात्वा विधानेन संध्याकर्म समाप्य च ।
पूजागृहं ततो गत्वा चक्रराजं समर्चयेत् ॥२३९॥

prātaḥ snātvā vidhānena saṃdhyākarma samāpya ca |
pūjāgṛhaṃ tato gatvā cakrarājaṃ samarcayet ||239||

SHLOKA 240

विद्यां जपेत्सहस्रं वा त्रिशतं शतमेव वा ।
रहस्यनामसाहस्रमिदं पश्चात्पठेन्नरः ॥२४०॥

vidyāṃ japetsahasraṃ vā triśataṃ śatameva vā |
rahasyanāmasāhasramidaṃ paścātpaṭhennaraḥ ||240||

SHLOKA 241

जन्ममध्ये सकृच्चापि य एवं पठते सुधीः ।
तस्य पुण्यफलं वक्ष्ये शृणु त्वं कुम्भसंभव ॥२४१॥

janmamadhye sakṛccāpi ya evaṃ paṭhate sudhīḥ |
tasya puṇyaphalaṃ vakṣye śṛṇu tvaṃ kumbhasaṃbhava ||241||

SHLOKA 242

गङ्गादिसर्वतीर्थेषु यः स्नायात्कोटिजन्मसु ।
कोटिलिङ्गप्रतिष्ठां तु यः कुर्यादविमुक्तके ॥२४२॥

gaṅgādisarvatīrtheṣu yaḥ snāyātkoṭijanmasu |
koṭiliṅgapratiṣṭhāṃ tu yaḥ kuryādavimuktake ||242||

SHLOKA 243

कुरुक्षेत्रे तु यो दद्यात्कोटिवारं रविग्रहे ।
कोटिं सौवर्णभाराणां श्रोत्रियेषु द्विजन्मसु ॥२४३॥

kurukṣetre tu yo dadyātkoṭivāraṃ ravigrahe |
koṭiṃ sauvarṇabhārāṇāṃ śrotriyeṣu dvijanmasu ||243||

SHLOKA 244

यः कोटिं हयमेधानामाहरेद्गाङ्गरोधसि ।
आचरेत्कूपकोटीर्यो निर्जले मरुभूतले ॥२४४॥

yaḥ koṭiṃ hayamedhānāmāharedgāṅgarodhasi |
ācaret kūpakoṭīryo nirjale marubhūtale ||244||

SHLOKA 245

दुर्भिक्षे यः प्रतिदिनं कोटिब्राह्मणभोजनम् ।
श्रद्धया परया कुर्यात्सहस्रपरिवत्सरान् ॥२४५॥

durbhikṣe yaḥ pratidinaṃ koṭibrāhmaṇabhojanam |
śraddhayā parayā kuryātsahasraparivatsarān ||245||

SHLOKA 246

तत्पुण्यं कोटिगुणितं लभेत्पुण्यमनुत्तमम् ।
रहस्यनामसाहस्रे नाम्नोऽप्येकस्य कीर्तनात् ॥२४६॥

tatpuṇyaṃ koṭiguṇitaṃ labhetpuṇyamanuttamam |
rahasyanāmasāhasre nāmno'pyekasya kīrtanāt ||246||

SHLOKA 247

रहस्यनामसाहस्रे नामैकमपि यः पठेत् ।
तस्य पापानि नश्यन्ति महान्त्यपि न संशयः ॥२४७॥

rahasyanāmasāhasre nāmaikamapi yaḥ paṭhet |
tasya pāpāni naśyanti mahāntyapi na saṃśayaḥ ||247||

SHLOKA 248

नित्यकर्माननुष्ठानान्निषिद्धकरणादपि ।
यत्पापं जायते पुंसां तत्सर्वं नश्यति द्रुतम् ॥२४८॥

nityakarmānanuṣṭhānānniṣiddhakaraṇādapi |
yatpāpaṃ jāyate puṃsāṃ tatsarvaṃ naśyati drutam ||248||

SHLOKA 249

बहुनात्र किमुक्तेन शृणु त्वं कलशीसुत ।
अत्रैकनाम्नो या शक्तिः पातकानां निवर्तने ।
तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश ॥२४९॥

bahunātra kimuktena śṛṇu tvaṃ kalaśīsuta |
atraikanāmno yā śaktiḥ pātakānāṃ nivartane |
tannivartyamaghaṃ kartuṃ nālaṃ lokāścaturdaśa ||249||

SHLOKA 250

यस्त्यक्त्वा नामसाहस्रं पापहानिमभीप्सति ।
स हि शीतनिवृत्त्यर्थं हिमशैलं निषेवते ॥२५०॥

yastyaktvā nāmasāhasraṃ pāpahānimabhīpsati |
sa hi śītanivṛttyarthaṃ himaśailaṃ niṣevate ||250||

SHLOKA 251

भक्तो यः कीर्तयन्नित्यमिदं नामसहस्रकम् ।
तस्मै श्रीललितादेवी प्रीताभीष्टं प्रयच्छति ॥२५१॥

bhakto yaḥ kīrtayannityamidaṃ nāmasahasrakam |
tasmai śrīlalitādevī prītābhīṣṭaṃ prayacchati ||251||

SHLOKA 252

अकीर्तयन्निदं स्तोत्रं कथं भक्तो भविष्यति ॥२५२॥

akīrtayannidaṃ stotraṃ kathaṃ bhakto bhaviṣyati ||252||

SHLOKA 253

नित्यं संकीर्तनाशक्तः कीर्तयेत्पुण्यवासरे ।
संक्रान्तौ विषुवे चैव स्वजन्मत्रितयेऽयने ॥२५३॥

nityaṃ saṃkīrtanāśaktaḥ kīrtayetpuṇyavāsare |
saṃkrāntau viṣuve caiva svajanmatritaye'yane ||253||

SHLOKA 254

नवम्यां वा चतुर्दश्यां सितायां शुक्रवासरे ।
कीर्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः ॥२५४॥

navamyāṃ vā caturdaśyāṃ sitāyāṃ śukravāsare |
kīrtayennāmasāhasraṃ paurṇamāsyāṃ viśeṣataḥ ||254||

SHLOKA 255

पौर्णमास्यां चन्द्रबिम्बे ध्यात्वा श्रीललिताम्बिकाम् ।
पञ्चोपचारैः संपूज्य पठेन्नामसहस्रकम् ॥२५५॥

paurṇamāsyāṃ candrabimbe dhyātvā śrīlalitāmbikām |
pañcopacāraiḥ saṃpūjya paṭhennāmasahasrakam ||255||

SHLOKA 256

सर्वे रोगाः प्रणश्यन्ति दीर्घमायुश्च विन्दति ।
अयमायुष्करो नाम प्रयोगः कल्पनोदितः ॥२५६॥

sarve rogāḥ praṇaśyanti dīrghamāyuśca vindati |
ayamāyuṣkaro nāma prayogaḥ kalpanoditaḥ ||256||

SHLOKA 257

ज्वरार्तं शिरसि स्पृष्ट्वा पठेन्नामसहस्रकम् ।
तत्क्षणात्प्रशमं याति शिरस्तोदो ज्वरोऽपि च ॥२५७॥

jvarārtaṃ śirasi spṛṣṭvā paṭhennāmasahasrakam |
tatkṣaṇātpraśamaṃ yāti śirastodo jvaro'pi ca ||257||

SHLOKA 258

सर्वव्याधिनिवृत्त्यर्थं स्पृष्ट्वा भस्म जपेदिदम् ।
तद्भस्मधारणादेव नश्यन्ति व्याधयः क्षणात् ॥२५८॥

sarvavyādhinivṛttyarthaṃ spṛṣṭvā bhasma japedidam |
tadbhasmadhāraṇādeva naśyanti vyādhayaḥ kṣaṇāt ||258||

SHLOKA 259

जलं संमन्त्र्य कुम्भस्थं नामसाहस्रतो मुने ।
अभिषिञ्चेद्ग्रहग्रस्तान्ग्रहा नश्यन्ति तत्क्षणात् ॥२५९॥

jalaṃ saṃmantrya kumbhasthaṃ nāmasāhasrato mune |
abhiṣiñcedgrahagrastāngrahā naśyanti tatkṣaṇāt ||259||

SHLOKA 260

सुधासागरमध्यस्थां ध्यात्वा श्रीललिताम्बिकाम् ।
यः पठेन्नामसाहस्रं विषं तस्य विनश्यति ॥२६०॥

sudhāsāgaramadhyasthāṃ dhyātvā śrīlalitāmbikām |
yaḥ paṭhennāmasāhasraṃ viṣaṃ tasya vinaśyati ||260||

फलश्रुति: काम्य दावे और दान-पात्रता

SHLOKA 261

वन्ध्यानां पुत्रलाभाय नामसाहस्रमन्त्रितम् ।
नवनीतं प्रदद्यात्तु पुत्रलाभो भवेद्ध्रुवम् ॥२६१॥

vandhyānāṃ putralābhāya nāmasāhasramantritam |
navanītaṃ pradadyāttu putralābho bhaveddhruvam ||261||

SHLOKA 262

देव्याः पाशेन संबद्धामाकृष्टामङ्कुशेन च ।
ध्यात्वाभीष्टां स्त्रियं रात्रौ पठेन्नामसहस्रकम् ॥२६२॥

devyāḥ pāśena saṃbaddhāmākṛṣṭāmaṅkuśena ca |
dhyātvābhīṣṭāṃ striyaṃ rātrau paṭhennāmasahasrakam ||262||

SHLOKA 263

आयाति स्वसमीपं सा यद्यप्यन्तःपुरं गता ।
राजाकर्षणकामश्चेद्राजावसथदिङ्मुखः ॥२६३॥

āyāti svasamīpaṃ sā yadyapyantaḥpuraṃ gatā |
rājākarṣaṇakāmaścedrājāvasathadiṅmukhaḥ ||263||

SHLOKA 264

त्रिरात्रं यः पठेदेतच्छ्रीदेवीध्यानतत्परः ।
स राजा पारवश्येन तुरङ्गं वा मतङ्गजम् ॥२६४॥

trirātraṃ yaḥ paṭhedetacchrīdevīdhyānatatparaḥ |
sa rājā pāravaśyena turaṅgaṃ vā mataṅgajam ||264||

SHLOKA 265

आरुह्य याति निकटं दासवत्प्रणिपत्य च ।
तस्मै राज्यं च कोशं च दद्यादेव वशं गतः ॥२६५॥

āruhya yāti nikaṭaṃ dāsavatpraṇipatya ca |
tasmai rājyaṃ ca kośaṃ ca dadyādeva vaśaṃ gataḥ ||265||

SHLOKA 266

रहस्यनामसाहस्रं यः कीर्तयति नित्यशः ।
तन्मुखालोकमात्रेण मुह्येल्लोकत्रयं मुने ॥२६६॥

rahasyanāmasāhasraṃ yaḥ kīrtayati nityaśaḥ |
tanmukhālokamātreṇa muhyellokatrayaṃ mune ||266||

SHLOKA 267

यस्त्विदं नामसाहस्रं सकृत्पठति भक्तिमान् ।
तस्य ये शत्रवस्तेषां निहन्ता शरभेश्वरः ॥२६७॥

yastvidaṃ nāmasāhasraṃ sakṛtpaṭhati bhaktimān |
tasya ye śatravasteṣāṃ nihantā śarabheśvaraḥ ||267||

SHLOKA 268

यो वाभिचारं कुरुते नामसाहस्रपाठके ।
निवर्त्य तत्क्रियां हन्यात्तं वै प्रत्यङ्गिरा स्वयम् ॥२६८॥

yo vābhicāraṃ kurute nāmasāhasrapāṭhake |
nivartya tatkriyāṃ hanyāttaṃ vai pratyaṅgirā svayam ||268||

SHLOKA 269

ये क्रूरदृष्ट्या वीक्षन्ते नामसाहस्रपाठकम् ।
तानन्धान्कुरुते क्षिप्रं स्वयं मार्तण्डभैरवः ॥२६९॥

ye krūradṛṣṭyā vīkṣante nāmasāhasrapāṭhakam |
tānandhānkurute kṣipraṃ svayaṃ mārtaṇḍabhairavaḥ ||269||

SHLOKA 270

धनं यो हरते चौरैर्नामसाहस्रजापिनः ।
यत्र कुत्र स्थितं वापि क्षेत्रपालो निहन्ति तम् ॥२७०॥

dhanaṃ yo harate caurairnāmasāhasrajāpinaḥ |
yatra kutra sthitaṃ vāpi kṣetrapālo nihanti tam ||270||

SHLOKA 271

विद्यासु कुरुते वादं यो विद्वान्नामजापिनः ।
तस्य वाक्स्तम्भनं सद्यः करोति नकुलीश्वरी ॥२७१॥

vidyāsu kurute vādaṃ yo vidvānnāmajāpinaḥ |
tasya vākstambhanaṃ sadyaḥ karoti nakulīśvarī ||271||

SHLOKA 272

यो राजा कुरुते वैरं नामसाहस्रजापिनः ।
चतुरङ्गबलं तस्य दण्डिनी संहरेत्स्वयम् ॥२७२॥

yo rājā kurute vairaṃ nāmasāhasrajāpinaḥ |
caturaṅgabalaṃ tasya daṇḍinī saṃharetsvayam ||272||

SHLOKA 273

यः पठेन्नामसाहस्रं षण्मासं भक्तिसंयुतः ।
लक्ष्मीश्चाञ्चल्यरहिता सदा तिष्ठति तद्गृहे ॥२७३॥

yaḥ paṭhennāmasāhasraṃ ṣaṇmāsaṃ bhaktisaṃyutaḥ |
lakṣmīścāñcalyarahitā sadā tiṣṭhati tadgṛhe ||273||

SHLOKA 274

मासमेकं प्रतिदिनं त्रिवारं यः पठेन्नरः ।
भारती तस्य जिह्वाग्रे रङ्गे नृत्यति नित्यशः ॥२७४॥

māsamekaṃ pratidinaṃ trivāraṃ yaḥ paṭhennaraḥ |
bhāratī tasya jihvāgre raṅge nṛtyati nityaśaḥ ||274||

SHLOKA 275

यस्त्वेकवारं पठति पक्षमेकमतन्द्रितः ।
मुह्यन्ति कामवशगा मृगाक्ष्यस्तस्य वीक्षणात् ॥२७५॥

yastvekavāraṃ paṭhati pakṣamekamatandritaḥ |
muhyanti kāmavaśagā mṛgākṣyastasya vīkṣaṇāt ||275||

SHLOKA 276

यः पठेन्नामसाहस्रं जन्ममध्ये सकृन्नरः ।
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः ॥२७६॥

yaḥ paṭhennāmasāhasraṃ janmamadhye sakṛnnaraḥ |
taddṛṣṭigocarāḥ sarve mucyante sarvakilbiṣaiḥ ||276||

SHLOKA 277

यो वेत्ति नामसाहस्रं तस्मै देयं द्विजन्मने ।
अन्नं वस्त्रं धनं धान्यं नान्येभ्यस्तु कदाचन ॥२७७॥

yo vetti nāmasāhasraṃ tasmai deyaṃ dvijanmane |
annaṃ vastraṃ dhanaṃ dhānyaṃ nānyebhyastu kadācana ||277||

SHLOKA 278

श्रीमन्त्रराजं यो वेत्ति श्रीचक्रं यः समर्चति ।
यः कीर्तयति नामानि तं सत्पात्रं विदुर्बुधाः ॥२७८॥

śrīmantrarājaṃ yo vetti śrīcakraṃ yaḥ samarcati |
yaḥ kīrtayati nāmāni taṃ satpātraṃ vidurbudhāḥ ||278||

SHLOKA 279

तस्मै देयं प्रयत्नेन श्रीदेवीप्रीतिमिच्छता ।
यः कीर्तयति नामानि मन्त्रराजं न वेत्ति यः ॥२७९॥

tasmai deyaṃ prayatnena śrīdevīprītimicchatā |
yaḥ kīrtayati nāmāni mantrarājaṃ na vetti yaḥ ||279||

SHLOKA 280

पशुतुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम् ।
परीक्ष्य विद्याविदुषस्तेभ्यो दद्याद्विचक्षणः ॥२८०॥

paśutulyaḥ sa vijñeyastasmai dattaṃ nirarthakam |
parīkṣya vidyāviduṣastebhyo dadyādvicakṣaṇaḥ ||280||

स्तोत्र की श्रेष्ठता, गोपनीयता और समापन

SHLOKA 281

श्रीमन्त्रराजसदृशो यथा मन्त्रो न विद्यते ।
देवता ललितातुल्या यथा नास्ति घटोद्भव ॥२८१॥

śrīmantrarājasadṛśo yathā mantro na vidyate |
devatā lalitātulyā yathā nāsti ghaṭodbhava ||281||

SHLOKA 282

रहस्यनामसाहस्रतुल्या नास्ति तथा स्तुतिः ।
लिखित्वा पुस्तके यस्तु नामसाहस्रमुत्तमम् ॥२८२॥

rahasyanāmasāhasratulyā nāsti tathā stutiḥ |
likhitvā pustake yastu nāmasāhasramuttamam ||282||

SHLOKA 283

समर्चयेत्सदा भक्त्या तस्य तुष्यति सुन्दरी ।
बहुनात्र किमुक्तेन शृणु त्वं कुम्भसम्भव ॥२८३॥

samarcayetsadā bhaktyā tasya tuṣyati sundarī |
bahunātra kimuktena śṛṇu tvaṃ kumbhasambhava ||283||

SHLOKA 284

नानेन सदृशं स्तोत्रं सर्वतन्त्रेषु विद्यते ।
तस्मादुपासको नित्यं कीर्तयेदिदमादरात् ॥२८४॥

nānena sadṛśaṃ stotraṃ sarvatantreṣu vidyate |
tasmādupāsako nityaṃ kīrtayedidamādarāt ||284||

SHLOKA 285

एभिर्नामसहस्रैस्तु श्रीचक्रं योऽर्चयेत्सकृत् ।
पद्मैर्वा तुलसीपुष्पैः कह्लारैर्वा कदम्बकैः ॥२८५॥

ebhirnāmasahasraistu śrīcakraṃ yo'rcayetsakṛt |
padmairvā tulasīpuṣpaiḥ kahlārairvā kadambakaiḥ ||285||

SHLOKA 286

चम्पकैर्जातिकुसुमैर्मल्लिकाकरवीरकैः ।
उत्पलैर्बिल्वपत्रैर्वा कुन्दकेसरपाटलैः ॥२८६॥

campakairjātikusumairmallikākaravīrakaiḥ |
utpalairbilvapatrairvā kundakesarapāṭalaiḥ ||286||

SHLOKA 287

अन्यैः सुगन्धिकुसुमैः केतकीमाधवीमुखैः ।
तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः ॥२८७॥

anyaiḥ sugandhikusumaiḥ ketakīmādhavīmukhaiḥ |
tasya puṇyaphalaṃ vaktuṃ na śaknoti maheśvaraḥ ||287||

SHLOKA 288

सा वेत्ति ललिता देवी स्वचक्रार्चनजं फलम् ।
अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्पमेधसः ॥२८८॥

sā vetti lalitā devī svacakrārcanajaṃ phalam |
anye kathaṃ vijānīyurbrahmādyāḥ svalpamedhasaḥ ||288||

SHLOKA 289

प्रतिमासं पौर्णमास्यामेभिर्नामसहस्रकैः ।
रात्रौ यश्चक्रराजस्थामर्चयेत्परदेवताम् ॥२८९॥

pratimāsaṃ paurṇamāsyāmebhirnāmasahasrakaiḥ |
rātrau yaścakrarājasthāmarcayetparadevatām ||289||

SHLOKA 290

स एव ललितारूपस्तद्रूपा ललिता स्वयम् ।
न तयोर्विद्यते भेदो भेदकृत्पापकृद्भवेत् ॥२९०॥

sa eva lalitārūpastadrūpā lalitā svayam |
na tayorvidyate bhedo bhedakṛtpāpakṛdbhavet ||290||

SHLOKA 291

महानवम्यां यो भक्तः श्रीदेवीं चक्रमध्यगाम् ।
अर्चयेन्नामसाहस्रैस्तस्य मुक्तिः करे स्थिता ॥२९१॥

mahānavamyāṃ yo bhaktaḥ śrīdevīṃ cakramadhyagām |
arcayennāmasāhasraistasya muktiḥ kare sthitā ||291||

SHLOKA 292

यस्तु नामसहस्रेण शुक्रवारे समर्चयेत् ।
चक्रराजे महादेवीं तस्य पुण्यफलं शृणु ॥२९२॥

yastu nāmasahasreṇa śukravāre samarcayet |
cakrarāje mahādevīṃ tasya puṇyaphalaṃ śṛṇu ||292||

SHLOKA 293

सर्वान्कामानवाप्येह सर्वसौभाग्यसंयुतः ।
पुत्रपौत्रादिसंयुक्तो भुक्त्वा भोगान्यथेप्सितान् ॥२९३॥

sarvānkāmānavāpyeha sarvasaubhāgyasaṃyutaḥ |
putrapautrādisaṃyukto bhuktvā bhogānyathepsitān ||293||

SHLOKA 294

अन्ते श्रीललितादेव्याः सायुज्यमतिदुर्लभम् ।
प्रार्थनीयं शिवाद्यैश्च प्राप्नोत्येव न संशयः ॥२९४॥

ante śrīlalitādevyāḥ sāyujyamatidurlabham |
prārthanīyaṃ śivādyaiśca prāpnotyeva na saṃśayaḥ ||294||

SHLOKA 295

यः सहस्रं ब्राह्मणानामेभिर्नामसहस्रकैः ।
समर्च्य भोजयेद्भक्त्या पायसापूपषड्रसैः ॥२९५॥

yaḥ sahasraṃ brāhmaṇānāmebhirnāmasahasrakaiḥ |
samarcya bhojayedbhaktyā pāyasāpūpaṣaḍrasaiḥ ||295||

SHLOKA 296

तस्मै प्रीणाति ललिता स्वसाम्राज्यं प्रयच्छति ।
न तस्य दुर्लभं वस्तु त्रिषु लोकेषु विद्यते ॥२९६॥

tasmai prīṇāti lalitā svasāmrājyaṃ prayacchati |
na tasya durlabhaṃ vastu triṣu lokeṣu vidyate ||296||

SHLOKA 297

निष्कामः कीर्तयेद्यस्तु नामसाहस्रमुत्तमम् ।
ब्रह्मज्ञानमवाप्नोति येन मुच्येत बन्धनात् ॥२९७॥

niṣkāmaḥ kīrtayed yastu nāmasāhasramuttamam |
brahmajñānamavāpnoti yena mucyeta bandhanāt ||297||

SHLOKA 298

धनार्थी धनमाप्नोति यशोर्थी प्राप्नुयाद्यशः ।
विद्यार्थी चाप्नुयाद्विद्यां नामसाहस्रकीर्तनात् ॥२९८॥

dhanārthī dhanamāpnoti yaśorthī prāpnuyādyaśaḥ |
vidyārthī cāpnuyādvidyāṃ nāmasāhasrakīrtanāt ||298||

SHLOKA 299

नानेन सदृशं स्तोत्रं भोगमोक्षप्रदं मुने ।
कीर्तनीयमिदं तस्माद्भोगमोक्षार्थिभिर्नरैः ॥२९९॥

nānena sadṛśaṃ stotraṃ bhogamokṣapradaṃ mune |
kīrtanīyamidaṃ tasmādbhogamokṣārthibhirnaraiḥ ||299||

SHLOKA 300

चतुराश्रमनिष्ठैश्च कीर्तनीयमिदं सदा ।
स्वधर्मसमनुष्ठानवैकल्यपरिपूर्तये ॥३००॥

caturāśramaniṣṭhaiśca kīrtanīyamidaṃ sadā |
svadharmasamanuṣṭhānavaikalyaparipūrtaye ||300||

SHLOKA 301

कलौ पापैकबहुले धर्मानुष्ठानवर्जिते ।
नामानुकीर्तनं मुक्त्वा नृणां नान्यत्परायणम् ॥३०१॥

kalau pāpaikabahule dharmānuṣṭhānavarjite |
nāmānukīrtanaṃ muktvā nṛṇāṃ nānyatparāyaṇam ||301||

SHLOKA 302

लौकिकाद्वचनान्मुख्यं विष्णुनामानुकीर्तनम् ।
विष्णुनामसहस्राच्च शिवनामैकमुत्तमम् ॥३०२॥

laukikādvacanānmukhyaṃ viṣṇunāmānukīrtanam |
viṣṇunāmasahasrācca śivanāmaikamuttamam ||302||

SHLOKA 303

शिवनामसहस्राच्च देव्या नामैकमुत्तमम् ।
देवीनामसहस्राणि कोटिशः सन्ति कुम्भज ॥३०३॥

śivanāmasahasrācca devyā nāmaikamuttamam |
devīnāmasahasrāṇi koṭiśaḥ santi kumbhaja ||303||

SHLOKA 304

तेषु मुख्यं दशविधं नामसाहस्रमुच्यते ।
रहस्यनामसाहस्रमिदं शस्तं दशस्वपि ॥३०४॥

teṣu mukhyaṃ daśavidhaṃ nāmasāhasramucyate |
rahasyanāmasāhasramidaṃ śastaṃ daśasvapi ||304||

SHLOKA 305

तस्मात्संकीर्तयेन्नित्यं कलिदोषनिवृत्तये ।
मुख्यं श्रीमातृनामेति न जानन्ति विमोहिताः ॥३०५॥

tasmātsaṃkīrtayennityaṃ kalidoṣanivṛttaye |
mukhyaṃ śrīmātṛnāmeti na jānanti vimohitāḥ ||305||

SHLOKA 306

विष्णुनामपराः केचिच्छिवनामपराः परे ।
न कश्चिदपि लोकेषु ललितानामतत्परः ॥३०६॥

viṣṇunāmaparāḥ kecicchivanāmaparāḥ pare |
na kaścidapi lokeṣu lalitānāmatatparaḥ ||306||

SHLOKA 307

येनान्यदेवतानाम कीर्तितं जन्मकोटिषु ।
तस्यैव भवति श्रद्धा श्रीदेवीनामकीर्तने ॥३०७॥

yenānyadevatānāma kīrtitaṃ janmakoṭiṣu |
tasyaiva bhavati śraddhā śrīdevīnāmakīrtane ||307||

SHLOKA 308

चरमे जन्मनि यथा श्रीविद्योपासको भवेत् ।
नामसाहस्रपाठश्च तथा चरमजन्मनि ॥३०८॥

carame janmani yathā śrīvidyopāsako bhavet |
nāmasāhasrapāṭhaśca tathā caramajanmani ||308||

SHLOKA 309

यथैव विरला लोके श्रीविद्याचारवेदिनः ।
तथैव विरलो गुह्यनामसाहस्रपाठकः ॥३०९॥

yathaiva viralā loke śrīvidyācāravedinaḥ |
tathaiva viralo guhyanāmasāhasrapāṭhakaḥ ||309||

SHLOKA 310

मन्त्रराजजपश्चैव चक्रराजार्चनं तथा ।
रहस्यनामपाठश्च नाल्पस्य तपसः फलम् ॥३१०॥

mantrarājajapaścaiva cakrarājārcanaṃ tathā |
rahasyanāmapāṭhaśca nālpasya tapasaḥ phalam ||310||

SHLOKA 311

अपठन्नामसाहस्रं प्रीणयेद्यो महेश्वरीम् ।
स चक्षुषा विना रूपं पश्येदेव विमूढधीः ॥३११॥

apaṭhannāmasāhasraṃ prīṇayedyo maheśvarīm |
sa cakṣuṣā vinā rūpaṃ paśyedeva vimūḍhadhīḥ ||311||

SHLOKA 312

रहस्यनामसाहस्रं त्यक्त्वा यः सिद्धिकामुकः ।
स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति ॥३१२॥

rahasyanāmasāhasraṃ tyaktvā yaḥ siddhikāmukaḥ |
sa bhojanaṃ vinā nūnaṃ kṣunnivṛttimabhīpsati ||312||

SHLOKA 313

यो भक्तो ललितादेव्याः स नित्यं कीर्तयेदिदम् ।
नान्यथा प्रीयते देवी कल्पकोटिशतैरपि ॥३१३॥

yo bhakto lalitādevyāḥ sa nityaṃ kīrtayedidam |
nānyathā prīyate devī kalpakoṭiśatairapi ||313||

SHLOKA 314

तस्माद्रहस्यनामानि श्रीमातुः प्रयतः पठेत् ।
इति ते कथितं स्तोत्रं रहस्यं कुम्भसंभव ॥३१४॥

tasmādrahasyanāmāni śrīmātuḥ prayataḥ paṭhet |
iti te kathitaṃ stotraṃ rahasyaṃ kumbhasaṃbhava ||314||

SHLOKA 315

नाविद्यावेदिने ब्रूयान्नाभक्ताय कदाचन ।
यथैव गोप्या श्रीविद्या तथा गोप्यमिदं मुने ॥३१५॥

nāvidyāvedine brūyānnābhaktāya kadācana |
yathaiva gopyā śrīvidyā tathā gopyamidaṃ mune ||315||

SHLOKA 316

पशुतुल्येषु न ब्रूयाज्जनेषु स्तोत्रमुत्तमम् ।
यो ददाति विमूढात्मा श्रीविद्यारहिताय तु ॥३१६॥

paśutulyeṣu na brūyājjaneṣu stotramuttamam |
yo dadāti vimūḍhātmā śrīvidyārahitāya tu ||316||

SHLOKA 317

तस्मै कुप्यन्ति योगिन्यः सोऽनर्थः सुमहान्स्मृतः ।
रहस्यनामसाहस्रं तस्मात्संगोपयेदिदम् ॥३१७॥

tasmai kupyanti yoginyaḥ so'narthaḥ sumahānsmṛtaḥ |
rahasyanāmasāhasraṃ tasmātsaṃgopayedidam ||317||

SHLOKA 318

स्वतन्त्रेण मया नोक्तं तवापि कलशीभव ।
ललिताप्रेरणादेव मयोक्तं स्तोत्रमुत्तमम् ॥३१८॥

svatantreṇa mayā noktaṃ tavāpi kalaśībhava |
lalitāpreraṇādeva mayoktaṃ stotramuttamam ||318||

SHLOKA 319

कीर्तनीयमिदं भक्त्या कुम्भयोने निरन्तरम् ।
तेन तुष्टा महादेवी तवाभीष्टं प्रदास्यति ॥३१९॥

kīrtanīyamidaṃ bhaktyā kumbhayone nirantaram |
tena tuṣṭā mahādevī tavābhīṣṭaṃ pradāsyati ||319||

SHLOKA 320

सूत उवाच

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ।
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत् ॥३२०॥

ityuktvā śrīhayagrīvo dhyātvā śrīlalitāmbikām |
ānandamagnahṛdayaḥ sadyaḥ pulakito'bhavat ||320||

COLOPHON

इति श्रीब्रह्माण्डपुराणे ललितोपाख्याने हयग्रीवागस्त्यसंवादे ललितासहस्रनामस्तोत्रं नाम षट्त्रिंशोऽध्यायः ॥ ३६॥

iti śrībrahmāṇḍapurāṇe lalitopākhyāne hayagrīvāgastyasaṃvāde lalitāsahasranāmastotraṃ nāma ṣaṭtriṃśo'dhyāyaḥ ||36||